Amachkosh Sāhika

अमरकोशःसटीकःपुस्तक

॥ श्रीगणेशाय नमः ॥ श्रीगुरुभ्यो नमः ॥ श्रीसरस्वत्यै नमः ॥ श्री

ॐ हरिं शिवं विधातारं तत्पत्नीस्तत्सुतान्गुरून् ॥ नत्वा समस्ततत्रसूद-
ये मंगलाय च ॥ १ ॥ पदवाक्यप्रमाणज्ञैः क्षीरस्वाम्यादि[illegible]रिभिः ॥ कृतान्
थान्समालोच्य बालानां सुखबुद्धये ॥ २ ॥ यत्कृतं सूरि[illegible]र्दिननामलिंगानु-
शासनं ॥ तत्रत्यायाः पदावल्या विवृत्तिर्वक्ष्यते मया ॥ ३ ॥ यस्य ज्ञानदयासिं-
धोरगाधस्यानघा गुणाः ॥ सेव्यतामक्षयो धीराः स श्रिये चामृताय च ॥ १ ॥ हे
धीराः विद्वांसः ॥ यस्य गुणाः अनघाः निर्मलाः स देवः श्रिये च अमृताय च
मोक्षाय च ॥ सेव्यतां आराध्यतां ॥ भुक्तिमुक्तिफलप्राप्त्यर्थिभिः ॥ किंविशिष्ट-
ज्ञानं दया च तयोः ॥ सिंधुस्तस्य अगाधस्य ॥ विषयालिप्सारहितस्य ॥ किंविधः ॥
अक्षयः क्षयरहितः ॥ श्लोकोयं समुद्रपक्षे प्युदनीयः ॥ अस्य विद्वानो ॥ रयोनि-
वासः अक्षयः ॥ १ ॥ समाहृत्येति ॥ समाहृत्यान्यतंत्राणि संक्षिप्तैः प्रतिसंस्कृतैः

संपूर्णमुच्यते वर्गैर्नामलिंगानुशासनं ॥२॥ अन्यतंत्राणि निघंटुतराणि समा
हृत्य ए[illegible] संक्षिप्तैः संकुचितैः । प्रतिसंस्कृतैः । पर्यायपदैर्वर्गैः सजातीय
समूहैः । प्रधानांगोपांगशब्दसमूहेभ्यः । नाम्नां पर्यायाणां स्त्रीपुंनपुंसको
नां । अनुशासनं शिक्षा संपूर्णं । रू० पर्यायापरित्यागेन उच्यते ॥२॥ प्रायशो
रूपभेदेन साहचर्याच्च कुत्रचित् । स्त्रीपुंनपुंसकं ज्ञेयं तद्विशेषविधेः
क्वचित् ॥३॥ स्त्रीपुंनपुंसकं प्रायशः । प्रायेण रूपभेदेन ज्ञेयं । तद्यथा ॥ मनी
षा धिषणेति । कुत्रचित्साहचर्यात् । तद्यथा । तडित् सौदामिनीति । क्वचि
त्वेषां लिंगानां विशेषविधेर्ज्ञेयं । भेरी स्त्री दुंदुभिः पुमानिति । लिंगत्रये धूर्त ।
भेदाख्यानाय न द्वंद्वो नैकशेषो न संकरः । कृतोऽत्र भिन्नलिंगानामनुक्तानां क्र
मादृते ॥४॥ अत्र ग्रंथे भिन्नलिंगानां पदानां अनुक्तानां क्रमादृते । भेदाख्या
नाय न द्वंद्वो न कृतः । एकशेषसमासो न कृतः । भेदाख्यानाय लिंगांतरज्ञापना

र्थं द्वंद्वः स्तत ॥ तद्यथा ॥ उखाकुंडमित्युक्ते न तु उखाकुंडे इति ॥ एकशेषो यथा नव
नभः खं श्रावणो नभा इत्युक्ते न तु खश्रावणौ च नभसाविति ॥ संकरोपि न कृतः ॥ स्तव
स्तोत्रं नुतिः स्तुतिः ॥ स्तुतिः स्तोत्रं स्तवो नुतिरिति ॥ संकरो नाम सा [illegible] ॥ भिन्नलिंग
नां नानालिंगानामनुक्तानां क्रमादृते भिन्नलिंगानामनुक्तासन [illegible] एकशेषसंकरो
मी इति क्रमं विना न करोमीत्यर्थः ॥ त्रिलिंग्यां त्रिष्विति पदं ॥ मिथुने तु द्वयोरिति ॥
निषिद्धलिंगं शेषार्थं त्वंताथादि न पूर्वभाक् ॥ प ॥ त्रिष्विति [illegible] लिंगत्रये ज्ञेयं
यथा तटं त्रिष्विति ॥ मिथुने ॥ द्वयोरित्युक्ते स्त्रीपुंल्लिंगे ज्ञेयं यथा रेणुर्द्वयोरिति ॥ एक
लिंगनिषेधे अवशिष्टलिंगं ज्ञेयं ॥ यथा विमानो स्त्रीति ॥ तुराद्यंतं तेयस्य तत् ॥
त्वंतं अथ शब्दः आदौ यस्य तत् अथादि ॥ च पदं पूर्वपदं च भजति ॥ पा ॥ [illegible] स्व
र् [illegible] दिशाः [illegible] ॥ सुरलोको द्यौ दिवौ द्वे स्त्रियां क्लीबे त्रिवि
ष्टपं ॥ द ॥ अथ टीका ॥ शास्त्रेषु स्वर्यते स्वः ॥ स्वर शब्दोपतापयोः ॥ स्वः सुखं गम्यते स्वर्गः ॥

गमु लृ स्वपु लृ गतौ ॥ सु धातु अर्जं तेवा ॥ अर्ज सर्जने ॥ न विद्यते अकम सुखमत्रेति ना
कः ॥ त्रितीया चासौ द्यौश्च त्रिदिवः ॥ त्रिदशानामालयस्त्रिदशालयः ॥ सुराणां
लोकः सुरलोकः ॥ दीव्यंत्यस्यामिति द्यौः ॥ द्यौश्च दिव क्रीडा विजिगीषा व्यवहा
र द्युति स्तुति मोद मद स्वप्न कांति गतिषु ॥ इमा ओकारांत वकारांतौ ॥ तृतीयं च वि
तरु चिष्टपं च त्रिविष्टपं ॥ ६ ॥ मूल ॥ अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः ॥
सुपर्वाणः सुमनसस्त्रिदिवेशा दिवौकसः ॥ ७ ॥ टीका ॥ एतानि स्वर्गनामानि
न म्रियंत इत्यमराः ॥ मृङ् प्राणत्यागे ॥ न विद्यते जरा येषां ते निर्जराः ॥ दीव्यंति
देवाः ॥ दिव क्रीडादौ ॥ त्रिर्दशा परिमाणं वयो येषां ते त्रिदशाः ॥ विबुध्यंत इ
ति विबुधाः ॥ बुध अवगमने ॥ सुरंति सुराः ॥ सुर ऐश्वर्ये ॥ सुष्ठु राजंते वा ॥ राज दी
प्तौ ॥ भक्त्या द[illegible]सुरां तिवा ॥ रै शब्दे ॥ अब्धिजा सुरामस्तीति वा ॥ सुष्ठु वांछितं

फलं रांति ददतीति वा॥ रा दाने॥ सुष्ठु पर्वं निरालयंति सुपर्वाणः॥ पृ पालनपूरणयोः॥ शो
भनं पर्व कर्माचरंति तत्र एषामिति वा॥ सुष्ठु मन्यंते सुमनसः॥ मन ज्ञाने॥ शोभनं चित्त
द्या॥ त्रिदिवस्य ईशाः त्रिदिवेशाः॥ द्यौः। दिवः स्वर्गः ओको येषां ते दिवौकसः॥ मूलं॥ आदि
तेया दिविषदो लेखा अदितिनंदनाः॥ आदित्या ऋभवो स्वप्ना अमर्त्या अमृतां
धसः॥ ८॥ अथ टीका॥ अदितेरपत्यानि आदितेयाः॥ आदित्यस्मात् दिवि सीदं
ति दिविषदः॥ षद्लृ विसरणगत्यवसादनेषु॥ लिख्यं[illegible] पदादेः [illegible]॥ लिख
लेखने॥ प्राणिनां शुभाशुभं लिखंतीति वा॥ लिख अक्षरविन्यासे॥ अदि
तेः पुत्राः अदितिनंदनाः॥ इयर्ति ऋभवः॥ रपि स्वर्गो भवंतीति वा॥ न विद्यते स्वप्नो ये
षां ते अस्वप्नाः॥ मर्त्यादन्ये अमर्त्याः॥ अमृतमंधो येषां ते अमृतांधसः॥ ॥ मूलं॥ बर्हि
र्मुखाः क्रतुभुजो गीर्वाणा दानवारयः॥ वृंदारका दैवतानि पुंसि वा देवताः स्त्रियां॥ ९॥

टीका॥ बर्हिरग्निर्मुखं येषां ते बर्हिर्मुखाः॥ क्रतौ भुंजंते क्रतुभुजः॥ भुज पालनाभ्यवहार
रयोः॥ गिरं वणंति व्याकुर्वंते गीर्वाणाः॥ वण ध्वण शब्दे॥ गीर्वाणा येषामिति गीर्वाणाः॥
गिरं वणंति वा॥ वण संभक्तौ॥ दानवानामरयः॥ दानवारयः॥ शोभनं वृंदं येषां ते
वृंदारकाः॥ देव एव देवतानि॥ देवतास्त्र्यां॥ देवनामानि॥ स्मृत॥ आदित्य विश्व वस
वस्तुषिता भास्वरा निलाः॥ महाराजिक साध्याश्च रुद्राश्च गणदे[illegible]ताः॥ १०॥ टी॥
आदित्याः ते द्वादश॥ अष्टादौ विंदंशाति विश्वे॥ विश प्रवेशने॥ ते त्रयोदश॥ वसंति व
सवः॥ वस निवासे॥ तेऽष्टौ॥ तुष्यंति तुषिताः॥ तुष तुष्टौ॥ ते षट्त्रिंशत्॥ आभासंति विभा
स्वराः॥ भास दीप्तौ॥ ते चतुःषष्टिः॥ अनंति अनिलाः॥ अन प्राणने॥ [illegible] पां नवरंति वा
ते एकोनपंचाशत्॥ महाराज शब्दो येषामिति महाराजिकाः॥ षट्त्रिंशदते॥ साध्यं
आराध्यंते साध्याः॥ राध साध संसिद्धौ॥ ते द्वादश॥ रोदयंति॥ दुष्टान् रुद्राः॥ रुदिर [illegible]

स्य विमोचने ॥ तेरस्कादश ॥ एतानि समष्टदेवनामानि ॥ अथ मूलं ॥ विद्याधरा
प्सरो यक्षरक्षोगंधर्वकिंनराः ॥ पिशाचो गुह्यकः सिद्धो भूतोमी देवयोनयः ॥ १२ ॥ टी
का ॥ मूलिकांजनादि विद्यां धारयंति विद्याधराः ॥ क्षुधा अधारणापोधनायेः ॥ ते जीमू
त वाहन पुष्पदंतादयः ॥ अद्भ्यः सनिर्गता अप्सरसः ॥ स्वर्गते ॥ आप्यंते सुकृत ... रिति
वा ॥ आप्लृ व्याप्तौ ॥ उर्वशीमुख्याः ॥ यक्ष्यंते यक्षाः ॥ यक्ष पूजायां ॥ ते कुबेरादयः ॥ रक्ष्यो रक्षं
त इति रक्षांसि ॥ रक्ष पालने ॥ एतानि चरावणादीनि ॥ गानं धारयंतीति गंधर्वाः ॥ ते हाहा
हूहू प्रभृतयः ॥ किंचिन्नराः किंनराः ॥ ते अश्वमुखादयः ॥ पिशितमश्नंति पिशाचाः ॥ अश
भोजने ॥ ते तामसिचारिणः ॥ निधिं गूहंतीति गुह्यकाः ॥ गुहू संवरणे ॥ ते मणिभद्रादयः ॥ अ
णिमासिद्धिरेषामस्तीति सिद्धाः ॥ सिध्यंतीति वा ॥ ते च विश्वावसुप्रभृतयः ॥ भवंति भूता
ते बालग्रहादयः ॥ मूलं ॥ असुरा दैत्यदैतेयदनुजेंद्रारिदानवाः ॥ शुक्रशिष्या दि ४

तिसुताः पूर्वदेवाः सुरद्विषः ॥ १२ ॥ टीका ॥ एतानि देवोद्भवनामानि ॥ यज्ञभागात् निरस्यंते
असुराः ॥ असु क्षेपणे ॥ सुरेभ्यः अन्ये वा ॥ असुना रातास्तथा वा ॥ दितेः पुत्राः दैत्याः दैतेया
श्च ॥ दनोर्जाता दनुजाः ॥ दानवाश्च ॥ इंद्रस्य अरयः इंद्रारयः ॥ शुक्रस्य शिष्याः ॥ शुक्रशि
ष्याः ॥ शुक्रशिष्याः ॥ दितेः सुता दितिसुताः ॥ पूर्वा निद्रादीन् दिव्यंति विजगीषंते पूर्वदे ॥
अथ पूर्वदेवाः ॥ सुरान् द्विषंति सुरद्विषः ॥ द्विष प्रीतौ ॥ एतान्यसुरनामानि ॥ अथ [illegible] अ
सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः ॥ समंतभद्रो भगवान्मारजिल्लोकजिज्जिनः
॥ १३ ॥ अथ टीका ॥ सर्वं जानातीति सर्वज्ञः ॥ ज्ञा अवबोधने ॥ शोभनं गतं ज्ञानमस्य सुगतः ॥ ग
सर्वं क्षणिकं बुध्यति बुद्धः ॥ धर्मस्य संसारोद्धरणादेः राजा धर्मराजः ॥ तथा सत्यं ज्ञान
तथा मस्य सुगतः ॥ समंताद्भद्रं मंगलं यस्य समंतभद्रः ॥ ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः
श्रियः ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरिति स्मरणात् ॥ सोऽस्यास्तीति भगवान् ॥ मारं

मंजयतिमारजित् स्कंदमारक्लेशमारादीन् जयति वा। लोकजित्। जयति जिनः।
जयेजिड् अभिभवति वा धातुः॥ ॥षडभिज्ञो दशबलो द्वयवादी विनायकः मुनी
द्रः श्रीघन शास्ता मुनिः शाक्यमुनिस्तु यः॥१४॥ दिव्यं चक्षुर्दिव्यं श्रोत्रं पूर्वनिवा
सानुस्मृतिपरचित्तज्ञानमाश्रयक्षयऋद्धिरित्येतिषट् अभिज्ञायस्य षडभिज्ञः। दा
तिक्षांतिशीलधैर्यशांतिवधोपायप्रणिधिज्ञानानि दशबलान्यस्य दशबलः
अद्वयमभेदं वदति॥ अद्वयवादी॥ वद व्यक्तायां वाचि॥ विनयति शिक्षयति विनाय
कः॥ णीञ् प्रापणे॥ मुनीनामिंद्रो मुनींद्रः॥ श्रिया योगाविभूत्या घनो निरंतरः श्री
घनः॥ शास्ति शास्ता॥ शासु अनुशिष्टौ॥ मन्यते मुनिः। मनु अवबोधने॥ एतानि
बुद्धनामानि॥ शाकदेशे प्रजातो मुनिः शाक्यमुनिः॥ ॥ मूलं॥ सशाक्यसिंहः सर्वार्थ
सिद्धः सौद्धोदनिश्च सः॥ गौतमश्चार्कबंधुश्च मायादेवीसुतश्च सः॥१५॥ अयद

का ॥ शाक्येषु श्रेष्ठः शाक्यसिंहः सर्वार्थेषु सिद्धः ॥ शुद्धोदनस्यापत्यं शौद्धोदनिः ॥ गौत
मस्यापत्यं गौतमः ॥ गोत्राद्वा गौतमः ॥ अर्कवंशत्वादर्कबंधुः ॥ मायादेव्याः सुतो माया
देवीसुतः ॥ ८ ॥ ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी पितामहः ॥ हिरण्यगर्भो लोकेशः
स्वयंभूश्चतुराननः ॥ १६ ॥ एतानि शाकदेशराजें बुद्धनामानि बृंहति ब्रह्मा बृंहि वृ
द्धौ ॥ आत्मनः भवत्यात्मभूः ॥ सुरश्चासौ ज्येष्ठश्च ॥ सुराणां ज्येष्ठो वा ॥ सुरज्येष्ठः ॥ परमे
ब्रह्मलोकाख्ये तिष्ठति परमेष्ठी ॥ ष्ठा गतिनिवृत्तौ ॥ पितॄणां पिता पितामहः ॥ हिरण्य
गर्भो यस्य हिरण्यगर्भः ॥ लोकानामीशो लोकेशः ॥ स्वयं भवति स्वयंभूः ॥ चतुराननः
अयमष्ट ॥ धाताब्जयोनिर्द्रुहिणो विरिंचिः कमलासनः ॥ स्रष्टा प्रजापतिर्वेधा विधा
धाता विश्वसृड्विधिः ॥ १७ ॥ अथ टीका ॥ धत्ते धाता विधाता च ॥ डु धाञ् धारणपो
षणयोः ॥ अब्जं योनिर्यस्य अब्जयोनिः ॥ द्रुह्यत्यसुरेभ्यो द्रुहिणः ॥ द्रुह जिघांसायां ॥ दु

नक्ति विरिंचिः॥ विचिकृविरोचने॥ विभिर्हंसैरिच्यते द्रुष्यत इति वा॥ विरिंचिरिति वा॥
विचिकृविरेचने॥ कमलासनः॥ सृजति स्रष्टा॥ विश्वं सृजति विश्वसृट्॥ सृज वि
प्रजापतिः॥ विदधाति वेधाः॥ विधिश्च विधि विधाने॥ ब्रह्मणो नामानि॥ म्स्त्नं॥ वि
ष्णुर्नारायणः कृष्णो वैकुंठो विष्टरश्रवाः॥ दामोदरो हृषीकेशः केशवो माधवः स्व
भूः॥ २८॥ टीका॥ विवेष्टि विष्णुः॥ विष व्याप्तौ॥ नरस्यापत्यं धर्मोरस्यपत्य॥ त्रःसेरपत्ये
नारायणः॥ नरस्येदं नारं वपुः अयनं स्येति वा॥ नरं नरसमूहं आपयति स्वकर्मे
ति वा॥ अय गतौ॥ नाराः आपः अयनं स्थानं यस्येति॥ रै शब्दे॥ राः शब्दाः अयं तेनि
र्गच्छंति यस्मात्स नारायणः॥ रायणादन्य अरायणः॥ न अरायणः॥ नारायणः॥ शि
व गम्य इत्यर्थः॥ करोति कृष्णः॥ डुकृञ् करणे॥ दैत्यान्कर्षतीति वा॥ कृष विलेखने॥
कृष्णवर्णत्वाद्वा॥ विकुंठाया अपत्यं वैकुंठः॥ विष्टराकारे श्रवसी श्रोत्रे यस्य स विष्टरः॥

श्री

श्रवाः ॥ विष्टराकारेण लग्नकर्णः ॥ श्रवसि यस्येति वा ॥ व्यापनशीलं श्रवः कीर्तिर्यस्य
ति वा ॥ उदरे दाम यस्य स दामोदरः ॥ हृषीकाणामिंद्रियाणामीशो हृषीकेशः ॥ शो
भनाः केशा यस्य केशवः ॥ कश्च अश्च ईशश्च केशाः ॥ ब्रह्मविष्णवीशाः ॥ तस्मिन्वसं
तीति वा ॥ मधोरपत्यं माधवः ॥ मायाः लक्ष्म्या धवो वा ॥ माधूयते शत्रुभिरिति वा ॥ धु
र कंपने ॥ मधोरयं हंता वा स्वभूः ॥ ॥ मूल ॥ दैत्यारिः पुंडरीकाक्षो गोविंदो गरुडध्वजः ॥
पीतांबरोऽच्युतः शार्ङ्गी विष्वक्सेनो जनार्दनः ॥ १९ ॥ अथ टीका ॥ दैत्यारिः ॥ पुंडरीक
वदक्षिणी यस्य पुंडरीकाक्षः ॥ पुंडरीकं हृत्कमलमक्ष्णोति वा ॥ अक्षु व्याप्तौ ॥ गां भुवं
विंदति गोविंदः ॥ गाः धेनूः विंदति वा ॥ विद्लृ लाभे ॥ गरुडो ध्वजे यस्य गरुडध्वजे वे
तः अच्युतः ॥ च्युतिरक्षरणे ॥ पीतांबरः शार्ङ्गी विषूची सर्वगता सेना यस्य विष्वक्सेनः नि
जनानर्दयति सुखयतीति जनार्दनः ॥ अर्द गतौ याचने च ॥ ॥ मूल ॥ उपेंद्र इंद्रावर पु

क्रपाणिश्चतुर्भुजः॥ पद्मनाभो मधुरिपुर्वासुदेवस्त्रिविक्रमः॥२०॥ टीका॥ इंद्रमुप
उपेंद्रः॥ इंद्रावरजः॥ पाणौ चक्रं यस्य चक्रपाणिः॥ चतुर्भुजः॥ नाभौ पद्मं यस्य पद्मना
भः॥ मधुरिपुः॥ वसुदेवस्यापत्यं वासुदेवः॥ त्रयः पादा विक्रमेषु पदेषु यस्य त्रिविक्रम
मः॥ देवकीनंदनः शौरिः श्रीपतिः पुरुषोत्तमः॥ वनमाली बलिध्वंसी कंसारातिर
धोक्षजः॥२१॥ टीका॥ त्रीन् लोकान् विक्रमतीति वा॥ क्रमु पादविक्षेपे॥ शूरस्य वसुदेव
स्यापत्यं शौरिः॥ श्रीपतिः॥ पुरुषोत्तमः॥ पुरुषश्चासावुत्तमश्चेति वा॥ वनमालास्या
स्तीति वा॥ बलिं ध्वंसयति बलिध्वंसी॥ ध्वंसु अवस्रंसने॥ कंसारातिः॥ अक्षाणींद्रिया
ण्यधः कृतं यैस्ते अधोक्षाः॥ वसुदेवादयः॥ तेभ्यो जातः अधोक्षजः॥ अक्षजमैंद्रियं ज्ञा ७
नं अधः कृतं येनेति वा॥२१॥ मूल॥ विश्वंभरः कैटभजिद्विधुः श्रीवत्सलांछनः॥ पुरा
णपुरुषो यज्ञः पुरुषो नरकांतकः॥२२॥ टीका॥ विश्वं बिभर्ति विश्वंभरः॥ कैटभं जयतीति कै

४ अजित॥ विदधाति विधुः॥ विध विधाने॥ श्रीवत्सं लांछनं यस्य श्रीवत्सलांछनः॥
१ श्री विष्णुनामानि॥ वसुभिर्दीव्यति वसुदेवः॥ वसुषु अथ वसु दीव्यति वा॥ यस्य गृहे वि
ष्णोरुत्पत्तिसमये आनकाश्च दुंदुभयश्च वादिताः॥ इति आनकदुंदुभिः॥ विष्णुपितृ
नामानि॥॥ मत्स्ये॥ जलशाई विश्वरूपो मुकुंदो मुरमर्दनः॥ वसुदेवोस्य जनकः स ए
वानकदुंदुभिः॥ २२॥ बलभद्रः प्रलंबघ्नो बलदेवो च्युताग्रजः॥ रेवतीरमणो
रामः कामपालो हलायुधः॥ २३॥ टीका॥ बलेन भद्रो बलभद्रः॥ प्रलंबं हतवान् प्र
लंबघ्नः॥ बलेन दीव्यति बलदेवः॥ अच्युताग्रजः॥ रेवतीरमणः॥ रमयति रामः॥
रमु क्रीडायां॥ कामं पालयति कामपालः॥ हलं आयुधं यस्य हलायुधः॥ म वि
नीलांबरो रौहिणेयस्तालांको मुसली हली॥ संकर्षणः सीरपाणिः का ने
भेदनो बलः॥ २४॥ टीका॥ नीलांबरः॥ रोहिण्या अपत्यं पुमान् रौहिणेयः॥ तालं मु

स्य तालांक: ॥ मुसलमस्यास्तीति मुसली ॥ हलमस्यास्तीति हली ॥ संकर्षयतिसं-
संकर्षण: ॥ कृष विलेखने ॥ सीर: पाणौ यस्य सीरपाणि: ॥ कालिंदीं भिनत्तिका-
भेदन: ॥ भिद विदारणे ॥ बलमस्यास्तीति बल: ॥ मूलं ॥ मदनो मन्मथो मार:
म्नो मीनकेतन: ॥ कंदर्पो दर्पको नंग: काम: पंचशर: स्मर: ॥ २५ ॥ टीका ॥ बलभ-
न्नामानि ॥ मदयतीति मदन: ॥ मदी हर्षग्लपनयो: ॥ मथ्नाति मानसं मथ्नातीति मन्मथ: ॥ मं-
विलोठने ॥ वियुक्ता: अनेन म्रियंते मार: ॥ मृङ् प्राणत्यागे ॥ प्रकृष्टं द्युम्नं बलमस्य-
ति प्रद्युम्न: ॥ मीनकेतन: ॥ कं कुत्सितो दर्पो यस्य कंदर्प: ॥ दर्पं करोति दर्पक: ॥ कामय-
ते अनेन काम: ॥ कमु कांतौ ॥ पंचशर: ॥ स्मार्यते अनेन स्मर: ॥ स्मृ आध्याने ॥ मूलं ॥ शं-
बरारिर्मनसिज: कुसुमेषुरनन्यज: ॥ पुष्पधन्वा रतिपतिर्मकरध्वज आत्मभू: ॥ २६ ॥
टीका ॥ शंबरस्यासुरस्यारि: शंबरारि: ॥ मनसि जायते मनसिज: ॥ जनि प्रादुर्भावे ॥
म

ष

कुसुमानिबाणायस्यकुसुमेषुः॥ मनसःअन्यस्मान्नजायतेअनन्यजः॥ पुष्पंधनुर्यस्यपु
ष्पधन्वा॥ रतेःपतिःरतिपतिः॥ मकरोध्वजेयस्यमकरध्वजः॥ आत्मनोमनसोभवआत्मभूः
॥ ब्रह्मसूर्ऋश्यकेतुःस्यादनिरुद्धउषापतिः॥ लक्ष्मीःपद्मालयापद्माकमलाश्री
हरिप्रिया॥ २७॥ भस्मसात्तायाः॥ कामनामानि॥ ब्रह्मज्ञानेसुतःब्रह्मसूः॥ ऋश्यमृगःकेतौय
स्यऋश्यकेतुः॥ ननिरुध्यतेअनिरुद्धः॥ रुधिरआवरणे॥ उषायाःपतिः॥ अनिरुद्धनामा
नि॥ लक्ष्यतेलक्ष्मीः॥ लक्षदर्शनांकनयोः॥ पद्मालयोयस्याःपद्मालया॥ पद्यतेपद्मा
पद्सेवायां॥ पद्ममस्याअस्तीतिवा॥ कम्यतेकमला॥ कमुकांतौ॥ श्रीयतेश्रीः॥ श्रयतइ
तिवाश्रीः॥ श्रिञ्सेवायांहरेःप्रियाहरिप्रिया॥ मूलं॥ इंदिरालोकमातामाक्षीराब्धि
तनयारमा॥ शंखोलक्ष्मीपतेःपांचजन्यःचक्रंसुदर्शनं॥ २८॥ टीका॥ लक्ष्मीनामानि
पंचजनाख्येरक्षसिभवःपांचजन्यः॥ विष्णुशंखनाम॥ सुष्ठुदर्शनंयस्यसुदर्शनं॥ सु

ङ्गिगपक्षे ॥ सुष्ठुशात्रवान्नयतिसुदर्शनः ॥ द्विशिरप्रेरणे ॥ विष्णुचक्रनाम ॥ कुमोदयतिकु
मोदकीविष्णुस्तस्येदंकौमोदकी ॥ मदी हर्षग्लपनयोः ॥ कौमोदकीतिपाठे ॥ कौमोदका
ज्जायतेकौमोदकी ॥ विष्णुगदानाम ॥ नंदयतिनंदकः ॥ टुनदिसमृद्धौ ॥ विष्णुखड्गनाम
कौस्तुविस्तीर्णंभतेव्याप्नोतिकौस्तुभः ॥ समुद्रस्तत्रभवःकौस्तुभः ॥ विष्णुमणिनाम ॥ सस्त्रं ॥
कौमोदकीगदाखड्गोनंदकःकौस्तुभोमणिः ॥ गरुत्मान्गरुडस्तार्क्ष्योवैनतेयःखगेश्व
रः ॥ २९ ॥ टीका ॥ गरुडनाम ॥ नि ॥ शंसुखमस्माद्भवतिशंभुः ॥ ईष्टेईशः ॥ पशूनांपतिः ॥
पशुपतिः ॥ शेरतेसज्जनमनांसिअस्मिन्नितिशिवः ॥ अंतकालेजगदस्मिन्शेतेवा ॥
शीङ्स्वप्ने ॥ शिवकरत्वाद्वाशिवः ॥ शूलमस्तिशूली ॥ महांश्चासावीश्वरश्चमहेश्वरः ॥ म
हतामीश्वरोवा ॥ ईशेईश्वरः ॥ शृणातिशर्वः ॥ शृहिंसायां ॥ शंकरोतिशंकरः ॥ डुकृञ्करणे
चंद्रःशेखरेयस्यचंद्रशेखरः ॥ सस्त्रं ॥ नागांतकोविष्णुरथःसुपर्णःपन्नगाशनः ॥

जयःकृत्तिवासाःपिनाकीप्रमथाधिपः ॥२

शंभुरीशःपशुपतिःशिवःशूलीमहेश्वरः ॥ ३० ॥ ईश्वरःसर्वईशानःशंकरश्चंद्रशे
खरः ॥ भूतेशःखंडपरशुर्गिरीशोगिरिशोमृडः ॥ ३१ ॥ मृत्युं भूतानामीशोभूतेशः ॥
भूताःप्राणाः ॥ भूमात्रो ॥ तेषांमायोस्यतीतिवा ॥ स्पोतनुकरणे ॥ परशुनाखंडयतिखंडप
रशुः ॥ खडिखंडभेदने ॥ खंडपरशुरसुरोनेनेतिवा ॥ गिरीणांमीशोगिरीशः ॥ गिरौ
शेतेगिरिशः ॥ मृडयतिमृडः ॥ मृडसुखने ॥ मृत्युंजयतीतिमृत्युंजयः ॥ जिजये ॥ कृत्ति
श्चर्मवासोयस्यकृत्तिवासाः ॥ पिनाकोस्यास्तीतिपिनाकी ॥ प्रमथानामधिपःप्रमथा
धिपः ॥ सस्त्रं ॥ उग्रःकपर्दीश्रीकंठःशितिकंठःकपालभृत् ॥ वामदेवोमहादेवोवि
रूपाक्षस्त्रिलोचनः ॥ ३२ ॥ टीका ॥ उद्गच्छत्युग्रः ॥ गदउपादाने ॥ उग्रत्वाद्वा ॥ कपर्दो
स्यास्तीतिकपर्दी ॥ श्रीःशोभाकंठेयस्यश्रीकंठः ॥ शितिःकंठेयस्यशितिकंठः ॥ कपा
लंबिभर्तिकपालभृत् ॥ भृञ्भरणे ॥ वामःश्रेष्ठःस्चासौदेवश्चवामदेवः ॥ वामेसव्ये

दिग्वासेतिवा॥वामत्वाद्देवःवामदेवः॥महांश्चासौदेवश्चमहादेवः॥विरूपमक्षिय
स्यसःविरूपाक्षः॥त्रीणिलोचनानियस्यत्रिलोचनः॥मूलं॥कृशानुरेताःसर्वज्ञोधू
र्जटिर्नीललोहितः॥हरस्मरहरोभर्गस्त्र्यंबकस्त्रिपुरांतकः॥३७॥टीका॥कृशानोरे
तोयस्यकृशानुरेताः॥सर्वंजानातिसर्वज्ञः॥धूर्गंगाजटासुयस्यधूर्जटिः॥कंठेनीलःके
शेषुलोहितःनीललोहितः॥हरतीतिहरः॥हृञ्हरणे॥स्मरंहरतिस्मरहरः॥भर्जते
संसारोनेनभर्गः॥भ्रस्जपाके॥समलंबिभर्तिभर्गोवा॥त्रीण्यंबकानिलोचनानिय
स्यसःत्र्यंबकः॥द्यौर्भूमिरापस्तिस्रोंबायस्येतिवा॥त्रयाणांब्रह्मविष्णुरुद्राणामंबको
वा॥त्रिपुरासुरस्यांतकस्त्रिपुरांतकः॥मूलं॥गंगाधरोंधकरिपुःक्रतुध्वंसीवृषध्वजः॥
व्योमकेशोभवोभीमस्थाणूरुद्रउमापतिः॥३८॥गंगायाःधरोगंगाधरः॥अंधकासु १०
रस्यरिपुःअंधकरिपुः॥क्रतुंध्वंसयतिक्रतुध्वंसी॥ध्वंसुअवस्रंसने॥वृषोध्वजोयस्य

ष कुसुमानिइषवोयस्यकुसुमेषुः॥मनसःजन्मयस्मान्नजायतेअनन्यजः॥पुष्पंधनुर्यस्यपु
ष्पधन्वा॥रतेःपतिःरतिपतिः॥मकरोध्वजेयस्यमकरध्वजः॥आत्मनोमनसोभवआत्मभूः॥
मूलं॥ब्रह्मसूर्ऋश्यकेतुःस्यादनिरुद्धउषापतिः॥लक्ष्मीःपद्मालयापद्माकमलाश्री
र्हरिप्रिया॥२७॥अस्यस्तनयाः॥कामनामानि॥ब्रह्मज्ञानंसुतवब्रह्मसूः॥ऋश्यमृगःकेतौय
स्यऋश्यकेतुः॥ननिरुध्यतेअनिरुद्धः॥रुधिरुआवरणे॥उषायाःपतिः॥अनिरुद्धनामा
नि॥लक्ष्यतेलक्ष्मीः॥लक्षदर्शनांकनयोः॥पद्ममालयोयस्याःपद्मालया॥पद्मतेपद्मा
पदसेवायां॥पद्ममस्याअस्तीतिवा॥कम्यतेकमला॥कमुकांतौ॥श्रीयतेश्रीः॥श्रयतेइ
तिवाश्रीः॥श्रिञ्सेवायां॥हरेःप्रियाहरिप्रिया॥मूलं॥इंदिरालोकमातामाक्षीराब्धि
तनयारमा॥शंखोलक्ष्मीपतेःपांचजन्यश्चक्रंसुदर्शनं॥२८॥टीका॥लक्ष्मीनामानि
पंचजनाख्यरक्षसिभवःपांचजन्यः॥विष्णुशंखनाम॥सुष्टुदर्शनंयस्यसुदर्शनं॥सु

मष्टानांनाम॥मूल॥ब्राह्मीमाहेश्वरीचैवकौमारीवैष्णवीतथा॥वाराहीचतथेंद्रा
णीचामुंडाःसप्तमातरः॥२७॥विभूतिर्भूतिरैश्वर्यमणिमादिकमष्टधा॥अणि
मामहिमाचैवलघिमागरिमातथा॥प्राप्तिःप्राकाम्यमीशित्वंवशित्वंचाष्टभू
तयः॥२८॥उमाकात्यायनीगौरीकालीहैमवतीश्वरी॥टीका॥विभवतिविभू
तिः॥भूतिश्च॥ईश्वरस्यभावःकर्मवाऐश्वर्यं॥अणिमालघिमाप्राप्तिर्गरिमामहि
मेतिस्मृता॥प्राकाम्यंचेसिताचेतिऐश्वर्याष्टकमुच्यते॥अणिमाद्यैश्वर्यनामानि
अवतिउमा॥अवरक्षणे॥तपसःमात्राउमेतिनिषिद्धावा॥कतिअयनानिसंती
तिविचारयतिकात्यायनः॥तस्यापत्यंगोत्रस्त्रीकात्यायनी॥गौरवर्णत्वाद्गौरी॥तप
सेअगुरतगौरी॥गुरीउद्यमने॥अकालवर्णत्वात्काली॥हिमवतोपत्यंस्त्रीहैम
वती॥ईश्वरपत्नीईश्वरी॥इष्टइतिवाईश्वरी॥मूल॥शिवाभवानीरुद्राणीशर्वा

णीसर्वमंगला॥अपर्णापार्वतीदुर्गामृडानीचंडिकांबिका॥आर्यादाक्षायणीचैवगि
रिजामेनकात्मजा॥टीका॥शिवंमंगलमस्याअस्तिशिवा॥शिवस्यपत्नीवा॥अय
भवानीरुद्राणीशर्वाणीसर्वतोमंगलंयस्याःसासर्वमंगला॥पितुरपगतमृणंय
स्यासाअपर्णा॥पर्वतस्यपुत्रीपार्वती॥दुःखेनगम्यतेदुर्गा॥दुर्गनिवासोस्याइति
वा॥मृडस्यपत्नीमृडानी॥चंडतिचंडिका॥चडिकोपे॥चंडासुरमथनाद्वा॥अंब
यतेजनयतेसर्वमंबिका॥अंबजनने॥२७॥पार्वतीनामानि॥मूलं॥विनायको
विघ्नराजोद्वैमातुरगणाधिपः॥अप्येकदंतहेरंबलंबोदरगजाननः॥टीका॥
विगणेनायकःप्रभुर्यस्यविनायकः॥विनयतिशिक्षयतिदुष्टानितिवा॥णीञ्
प्रापणे॥विघ्नानांराजाविघ्नराजः॥द्वियोमात्रोरुमागंगयोद्वैमातुरः॥गणानामधि
पोगणाधिपः॥एकोदंतोयस्यएकदंतः॥हिइतिवर्धयतेनेत्यहेरंब॥रिहत्वौ

वर्द्धनायां हेरंबशब्दं करोति वा ॥ लंबमुदरं यस्य लंबोदरः ॥ गजस्येव वक्त्रमाननं यस्य
गजाननः ॥ विघ्नेश्वरनामानि ॥ ३७ ॥ मूलं ॥ कार्तिकेयो महासेनः शरजन्मा षडा
ननः ॥ पार्वतीनंदनस्कंदः सेनानीरग्निभूर्गुहः ॥ टीका ॥ कृत्तिकानामपत्यं कार्त्ति
केयः ॥ महती सेना यस्य महासेनः ॥ शरारण्ये जन्म यस्य शरजन्मा ॥ षट् आन
नान्यस्य षडाननः ॥ पार्वत्या नंदनः पार्वतीनंदनः ॥ ईश्वररेतः स्कंदयति शत्रून्शो
षयति वा स्कंदः ॥ स्कंदिर् गतिशोषणयोः ॥ सेनां नयति सेनानीः ॥ अग्नेर्भवति
अग्निभूः ॥ परायुधेभ्यः स्वसेनां गूहति गुहः ॥ ३८ ॥ मूलं ॥ बाहुलेयस्तारकजि
द्विशाखः शिखिवाहनः ॥ षाण्मातुरः शक्तिधरः कुमारः क्रौंचदारुणः ॥ ३९ ॥ १२
टीका ॥ गुहू संवरणे ॥ बहुलानां कृत्तिकानामपत्यं बाहुलेयः ॥ तारकासुरं जयति
तारकजित् ॥ जि जय अभिभवे ॥ विशाखासु भवः विशाखः ॥ विना मयूरेण शाखति

वृषध्वजः ॥ व्योमवत् विस्तीर्णाः केशा यस्य व्योमकेशः ॥ को वा भुःस्तदादीनामीशो वा ॥ स
र्वमस्माद्भवति भवः ॥ बिभेत्यस्मादिति भीमः ॥ ञिभी भये ॥ प्रलयेपि तिष्ठतीति स्थाणुः ॥
ष्ठागतिनिवृत्तौ ॥ रोदयति शत्रून् रुद्रः ॥ रुदिर् अश्रुविमोचने ॥ रुं संसारं ति वा ॥ देश
द्वे ॥ रतं रोदनं द्रावयति वा ॥ द्रु गतौ ॥ उमायाः पतिः उमापतिः ॥ मूलं ॥ कपर्दोस्य जटा
जूटः पिनाकोजगवं धनुः ॥ प्रमथाः स्युः पारिषदा ब्राह्मीत्याद्यास्तु मातरः ॥ ४० ॥ टीका ॥
ईश्वरनामानि ॥ कं शिरः पिपर्ति पूरयति कपर्दः ॥ पृ पालनपूरणयोः ॥ शिवजटाना
म ॥ अकस्य पिनाकं ति नमम इति पिनाकः ॥ अक अग कुटिलायां गतौ ॥ पिनह्यते वा
नह बंधने ॥ अजस्य कं अस्थि तद्विकारः ॥ अनकवं अजगवमिति वा पाठः ॥ ईश्वर
धनुर्नाम्नी ॥ प्रमथ्नंति शत्रूंश्च प्रमथाः ॥ मंथ विलोडने ॥ ईश्वरसभ्यनाम ॥ मातिवरि
वस्या विति मातरः ॥ मा माने वर्त्तमाने च ॥ शिवपथरिन्वर्योकारिणी ॥ ताब्राह्म्यादीनां

यतेयज्ञेषुपुरुहूतः ॥ पुरा शत्रुं विदारयति पुरंदरः ॥ दृ विदारणे ॥ ४२ ॥ मूल ॥ जिष्णुर्लेखर्-
षभः शक्रः शतमन्युर्दिवस्पतिः ॥ सुत्रामा गोत्रभिद्वज्री वासवो वृत्रहा वृषा ॥ ४३ ॥ टीका ॥
जयतिजिष्णुः ॥ लेखानां देवानामृषभो लेखर्षभः ॥ शक्नोति दुष्टजयेशक्रः ॥ शतमन्यवः क्र-
तवो यस्य शतमन्युः ॥ दिवः पतिः दिवस्पतिः ॥ सुष्ठु त्रायते सुत्रामा ॥ गोत्रपक्षलनो ॥ गोत्रा च
गिरीन्भिनत्ति गोत्रभित् ॥ भिद विदारणे ॥ वज्रोस्यास्तीति वज्री ॥ वसूनां अयं स्वामी वा
सवः ॥ वसवः न्यस्य संती वा ॥ वृत्रं हतवान् वृत्रहा ॥ हन हिंसागत्योः ॥ वर्षति वृषा ॥ वृष सेचने ॥
४२ ॥ मूल ॥ वास्तोष्पतिः सुरपतिर्बलारातिः शचीपतिः ॥ जंभभेदी हरिहयः स्वाराण्नमुचि
सूदनः ॥ ४३ ॥ टीका ॥ वास्तोः पतिः वास्तोष्पतिः ॥ सुरपतिः ॥ बलारातिः ॥ शचीपतिः ॥ जंभ
भेदी ॥ हरिता हया यस्य हरिहयः ॥ स्वर्गे राजते स्वराट् ॥ नमुचिं सूदयति नमुचिसूदनः ॥
४४ ॥ मूल ॥ संक्रंदनो दुश्च्यवनः तुराषाण्मेघवाहनः ॥ आखंडलः सहस्राक्ष ऋभुक्षा

स्तस्य तु प्रिया ॥ ४४ ॥ टीका ॥ सूद रणे ॥ संक्रंदयति शत्रून् संक्रंदनः ॥ क्रदि क्लदि आह्वा
दने रोदने च ॥ दुःखेन च्याव्यो तुं शक्यो दुश्च्यवनः ॥ च्युतिर क्षरणे ॥ शत्रूणां तुरं संदरते ल
रितं तुराषाट् ॥ मेघो वाहनमस्य मेघवाहनः ॥ आखंडयति रिपूनाखंडलः ॥ खडि खंड
ने ॥ सहस्रमक्षिणी यस्य सहस्राक्षः ॥ इयर्ति ऋभवः ॥ ऋ गतौ ॥ ऋभवो देवान् क्षिप
ति ऋभुक्षाः ॥ नांतः ॥ क्षिप प्रेरणे ॥ इंद्रनामानि ॥ ४४ ॥ मूल ॥ पुलोमजा सची इंद्राणी नग
री त्वमरावती ॥ हय उच्चैःश्रवाः सूतो मातलिर्नंदनं वनं ॥ ४५ ॥ टीका ॥ पुलोम्नो जाय
ते पुलोमजा ॥ जनि प्रादुर्भावे ॥ दसवच्छुचति शुची ॥ शचवाते ॥ इंद्रस्य पत्नी इंद्राणी ॥ इं
द्रभार्यानामानि ॥ अमरा अत्र वसंति अमरावती ॥ इंद्रनगरीनाम ॥ उच्चैःश्रवः कीर्तिर्य
स्य उच्चैःश्रवा ॥ उच्चैरुन्नते श्रवसी यस्येति ॥ इंद्रस्य नाम ॥ सूतकर्मणि मतान् लाति मा
तलिः तस्यापत्यं मातलिः ॥ इंद्रसारथिनाम ॥ नंदयति नंदनं ॥ टुनदि समृद्धौ ॥ इंद्रवननाम

मूलं॥ स्यात्प्रासादो वैजयंतो जयंतः पाकशासनिः॥ ऐरावतोभ्रमातंगैरावणाभ्रम
वल्लभाः॥ ४५॥ टीका॥ विजयंतस्यायं वैजयंतः॥ तत्प्रासादनाम॥ जयति शत्रून् जयंतः॥
पाकशासनपुत्रनाम॥ इराः अपो वसंत्यत्र इरावान् सिंधुः तत्र जातः ऐरावतः॥ अभ्रे
मातंगः अभ्रमातंगः॥ इरायां जलं तस्य धा नंदनं इरावणं॥ तत्र जातः ऐरावणः॥ अभ्रमो
र्वल्लभः अभ्रमुवल्लभः॥ ४६ इंद्रगजनामानि॥ मूलं॥ ह्रादिनी वज्रमस्त्री स्यात्कु
लिशं भिदुरं पविः॥ शतकोटिः स्वरुः शंबो दंभोलिरशनिर्द्वयोः॥ ४७॥ टीका॥ ह्रा
दोस्यास्तीति ह्रादिनी॥ ह्लादिनीति वा पाठः॥ वज्रति शीघ्रं वज्रं॥ वज्र व्रज गतौ॥ कुले
ते संतन्यते कीर्त्तिरनेनेति कुलिशं॥ कुल संताने॥ कुं भुवं लेशयतीति वा॥ लिश २४
अल्पीभावे॥ कुलीव पर्वतान् श्यतीति वा॥ श्यो तनूकरणे॥ कुलिशवज्रशब्दावस्त्रि
यो॥ भिनत्तीति छीस्यनेनेति भिदुरं॥ पुनाति वैरं पविः॥ पुञ् पवने॥ शतं कोटयोस्य संति

वा॥ शाख व्याप्तौ॥ शिखी वाहनमस्य शिखिवाहनः॥ षण्णां मातॄणामपत्यं षाण्मातुरः॥ श
क्तिधरः॥ कुत्सितं मारयतीति कुमारः॥ कुमार क्रीडायां॥ क्रौंचं गिरिं दारयति क्रौंचदारणः
त्र विदारणः॥ ४७॥ एतानि कुमारस्वामिनो नामानि॥ मूलं॥ इंद्रो मरुत्वान्मघवा बिडौ
जाः पाकशासनः॥ वृद्धश्रवाः शुनासीरः पुरुहूतः पुरंदरः॥ ४८॥ टीका॥ इं
दतीति इंद्रः॥ इदि परमैश्वर्ये॥ मरुतोस्य संतीति मरुत्वान्॥ मघमस्त्येषां मघवा॥ मह पूजायां॥
वेषति विडं॥ विड आक्रोशे॥ विड भेदने॥ विडं व्याप्तं तापनमाक्रोशकं वा तेजोस्ये
ति बिडौजाः॥ पाको नामासुरः तं शास्ति पाकशासनः॥ शासु अनुशिष्टौ॥ वृद्धेभ्यः श्रवणं
यस्य वृद्धश्रवाः॥ वृद्धं श्रवः कीर्तिरस्येति वा॥ वृद्ध इति श्रूयते वा॥ श्रु श्रवणे॥ शुनंति शुनाः
शुन गतौ॥ शुनाः सीरा यस्य सेनसाधने न शुनासीरः॥ शुनाः समृद्धाः सीरा येनेति वा॥ शुना
सीरौ वायुसूर्यौ अस्य स्त इति वा॥ सुष्ठु शोभनाः सीरा अग्रेसरा अस्येति वा॥ पुरुभूयिष्ठं

गा वियद्गंगा ॥ स्वः स्वर्गेनदी स्वर्णदी ॥ सुराणां दीर्घिका सुरदीर्घिका ॥ मंदाकिनी ना
म ॥ सुष्टु मिनोति शिखरे ज्योतींषि मेरुः सुमेरुश्च ॥ डुमिञ् प्रक्षेपणे ॥ हेम्यते हेम ॥ हे
म्यगतिकांत्योः ॥ हेम्नोद्रिः हेमाद्रिः ॥ रत्नानि सानुषु यस्य रत्नसानुः ॥ सुराणामालयः ॥
सुरालयः ॥ ४९ ॥ मेरुः शिखगिरिनामानि ॥ मूलं ॥ मंद्यते स्तूयते मंदारः ॥ मदि स्तुति
मोदमदस्वप्नकांतिगतिषु ॥ कुयक्कुसो ॥ हरेरिदं हरस्य चंदनं हरिचंदनं ॥ एतानि पंच
देवतरुनामानि ॥ ५० ॥ मूलं ॥ सनत्कुमारो वैधात्रः स्वर्वैद्यावश्विनीसुतौ ॥ नास
त्यावश्विनौ दस्रावाश्विनेयौ च तावुभौ ॥ ५१ ॥ टीका ॥ सन्वत् नित्यं कुमारः सन
त्कुमारः ॥ विधातुरपत्यं वैधात्रः ॥ वेदसंहिताकर्तृ विधातृपुत्रनामनी ॥ स्वर्गे वैद्यौ
स्वर्वैद्या ॥ उर्वशीमुखस्वर्वेश्यानाम ॥ अश्विन्याः सुतौ अश्विनीसुतौ ॥ न असत्यौ
नासत्यौ ॥ अश्वाननयोस्त इत्यश्विनौ ॥ दस्यतः क्षपयतो रोगान् दस्रौ ॥ दसु उपक्षये ॥

अश्विन्याः अपत्ये आश्विनेयौ ॥ ५१ ॥ स्वर्गवैद्ययोर्नामानि ॥ मूलं ॥ स्त्रियां बहुष्वप्सरसः ॥
स्वर्वेश्या उर्वशीमुखाः ॥ घृताची मेनका रंभा उर्वशी च तिलोत्तमा ॥ ५२ ॥ टीका ॥ अप्सर
सः ॥ उर्वशीमुखस्वर्वेश्यानाम ॥ अप्सरा इत्येकवचनांतं नामापि विद्यते ॥ गां धारयंति
गंधर्वाः ॥ हाहाहूहू प्रभृति देवगायकनाम ॥ ५२ ॥ सुकेशी मंजुघोषाद्याः कथ्यंते प्स
रसो बुधैः ॥ हाहा हूहूश्चैवमाद्याः ॥ गंधर्वास्त्रिदिवौकसां ॥ ५३ ॥ मूलं ॥ अग्निर्वैश्वा
नरो वह्निर्वीतिहोत्रो धनंजयः ॥ कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात् ॥ ५३ ॥
टीका ॥ अगत्यूर्ध्वं गच्छतीति अग्निः ॥ अग ऊर्ध्वगमने ॥ विश्वानरस्यापत्यं वैश्वानरः ॥
हव्यं वहतीति वह्निः ॥ वह प्रापणे ॥ होत्रस्य विशेषो वीतिः रश्वइव वहनादिति होत्रः ॥
वीतिरार्याणामशनं होत्रं सहोमस्य ॥ धनं तद्स्यास्तिवा वीतिहोत्रः ॥ धनंजयतिधनं
जयः ॥ जिजये ॥ कृपीटस्योदकस्य योनिः ॥ कृपीटयोनिः ॥ कृपीटं योनिरस्येति वा ॥ ज्वल

नो ज्वलनः॥ ज्वल दीप्तौ॥ जाते जाते विद्यते जातवेदाः॥ विद सत्तायां॥ जातं सर्वं भावभूतं वेत्ति
वा॥ विद ज्ञाने॥ वेदा हिरण्यमस्माज्जातमिति वा॥ तनूं न पातयति तनूनपात्॥ पद्भ्रं
तो॥ प॥ श॥ मूलं॥ बर्हिः शुष्मा कृष्णवर्त्मा शोचिष्केश उषर्बुधः॥ आश्रयाशो बृहद्भा
नुः कृशानुः पावकोऽनलः॥ ५४॥ टीका॥ बृंहति वर्धते बर्हिः॥ बृहि वृद्धौ॥ शोष
यति शुष्मा॥ बर्हिर्दर्भः शुष्मा स्त्री नमस्येति बर्हिः शुष्मा॥ दर्भस्तु नपुंसक एक नाम॥ कृ
ष्णं वर्त्म मार्गो यस्य कृष्णवर्त्मा॥ शोचींषि केशा यस्येति शोचिष्केशः॥ उषसि बुध्यते प्रका
श्यते उषर्बुधः॥ बुध अवगमने॥ आश्रयमश्नाति॥ आश्रयाशः॥ अश भोजने॥ आश्र
याश इति वा पाठः॥ बृहन्तो भानवो यस्य बृहद्भानुः॥ कृशाति तनूकरोति कृशानुः॥
कृश तनूकरणे॥ कृशेन मंदेन काष्ठेन अनइति वा॥ पुनाति पावकः॥ पुञ् पव
ने॥ अनति वर्धते अनलः॥ अन प्राणने॥ काष्ठादिभिरलं पर्याप्तिर्नास्त्यस्येति वा॥ ॥ मूलं॥ १६

शतकोटिः॥ स्वरति पराभवं स्वरुः॥ स्वर उपतापे॥ शमयति शत्रून् शंबः॥ शमु उपशमे
शातयन् दम्भोति दंभोलिः॥ दम्भु हिंसायां॥ अश्नाति शत्रूणां जीवितं अश्नुते वा अशनिः॥
अश भोजने॥ अशू व्याप्तौ॥ अशनी ति वा पाठः स्त्रीलिंगपक्षे॥ ४७॥ मूलं॥ व्योमया
नं विमानोऽस्त्री नारदाद्याः सुरर्षयः॥ स्यात्सुधर्मा देवसभा पीयूषममृतं सुधा॥ ४८॥
टीका॥ द्वे नामनी॥ व्योम्नि यानं व्योमयानं॥ विमाति वर्त्तते विमानं॥ मा माने वर्त्त
माने च॥ विमान नामानि॥ सुराणामृषयः सुरर्षयः॥ नारदादि देवर्षि नाम॥ शोभनो
धर्मोऽत्र सुधर्मा॥ नकारांतोऽप्यस्ति॥ देवसभा नाम॥ पीयते पीयूषं॥ पा पाने॥ न मृतो भ
वत्यनेन अमृतं॥ सुष्ठु धयंते तां सुधा॥ धेट् पाने॥ ४९॥ टीव मूलं॥ अमृत नामा
न नि॥ मंदाकिनी वियद्गंगा स्वर्णदी सुरदीर्घिका॥ मेरुः सुमेरुर्हेमाद्री रत्नसानुः सु
रालयः॥ ५०॥ टीका॥ मंदमकति मंदाकिनी॥ अक वक्रगतौ कुटिलायां गतौ॥ वियति गं

वडवायांभवःवाडवः॥वडवायामनलोवाडवानलः॥वडवाग्निनामानि॥मूलं॥वह्नेर्द्व
योर्ज्वालकीलावर्चिर्हेतिःशिखास्त्रियां॥त्रिषुस्फुलिंगोग्निकणःसंतापःसंज्वरःसमौ॥७॥
ज्वलतिज्वालः॥ज्वलदीप्तौ॥कीलतिपस्मादिगतिंकीलः॥कीलबंधे॥एतौद्वौद्वयोः॥अर्च्य
तेअर्चिः॥अर्चपूजायां॥स्त्रीनपुंसकयोरर्चिःशब्दः॥हन्यतेनयाहेतिः॥हनहिंसागत्योः॥दि
नोतिप्रव्रजतेवा॥श्लिगतौवृद्धौच॥हेतिशब्दःसूर्यवह्निदीप्तिपर्यायेस्त्रीलिंगः॥आयुध
पर्यायेद्वयोः॥शाखवतेशिखा॥शाखव्याप्तौ॥अग्निज्वालानामानि॥स्फुरतिस्फुलिंगः॥
स्फुलसंचलने॥अग्निकणनाम॥संतापयतिसंतापः॥तपसंतापे॥संज्वरयतिसंज्वरः
ज्वररोगे॥अग्निदाहनामानि॥ ॥मूलं॥धर्मराजःपितृपतिःसमवर्त्तीपरेतराट्॥कृ
तांतोयमुनाभ्राताशमनोयमराड्यमः॥प०टीका॥धर्मस्यराजाधर्मराजः॥पितॄणां
पतिःपितृपतिः॥समंवर्त्ततेसमवर्त्ती॥परेतेषुराजतेपरेतराट्॥राजृदीप्तौ॥कृतःअंतोये

नकृतांतः॥यमुनायाभ्रातायमुनाभ्राता॥शमतिशमनः॥यमेनराजतेयमराट्॥
यमतियच्छतियमः॥यमउपरमे॥मूलं॥कालोदंडधरःश्राद्धदेवोवैवस्वतोंत
कः॥राक्षसःकौणपःक्रव्यात्क्रव्यादोस्रपआसुरः॥प०टीका॥कालयतिका
लः॥कललिक्षेपे॥दंडंधारयतिदंडधारः॥श्राद्धस्यदेवश्राद्धदेवः॥विवस्वतः॥
अपत्यंवैवस्वतः॥अंतंकरोतीत्यंतकः॥यमनामानि॥रक्षएवराक्षसः॥कुणपंश
वमत्तिकौणपः॥कौणपंपातीतिवाकौणपः॥क्रव्यंमांसमत्तिक्रव्यात्॥क्रव्याद
श्च॥अदभक्षणे॥अस्रंरुधिरंपातिअस्रपः॥पापाने॥भक्ष्यंमांसेनस्रपयतिपच
तिवाअस्रपः॥स्रपाके॥असुरएवासुरः॥असुन्प्राणेन्चरातिवा॥आश्यएतिवा
आसुरः॥असहिंसायां॥मूलं॥रात्रिंचरोरात्रिचरःकर्बुरोनिकषात्मजः॥यातुधा
नःपुण्यजनोनैर्ऋतोयातुरक्षसी॥६०॥टीका॥रात्रौचरतिरात्रिचरः॥चरगति

मक्षणाये॥ कर्बूरवर्णत्वात्कर्बूरः॥ निकषाया आत्मजो निकषात्मजः॥ यातुर्नियातना
स्त्रीवृवेदना अस्मिन्नधीयंते यातुधानः॥ यातुविति नामधीयते त्रेति वा॥ पिरु इ लक्षणे
नपुण्यपवान् जनः पुण्यजनः॥ निर्ऋतेरपत्यं नैर्ऋतः॥ यातुनकारांतः॥ यातुनकारां
तः॥ यामापणे॥ रक्ष्यतेस्मात् ज्ञागदिति रक्षः॥ रक्षपालने॥ निर्ऋतिनामानि॥ ॥मूल
प्रचेता वरुणः पाशी यादसांपतिरप्पतिः॥ श्वसनस्पर्शनो वायुर्मातरिश्वा सदाग
तिः॥ ॥टीका॥ प्रकृष्टं चेतो यस्य प्रचेताः॥ वृणोति पाशैर्वरुणः॥ वृञ् वरणे॥ पाशो
स्यास्तीति पाशी॥ यादसांपतिः॥ अपांपतिः॥ अप्पतिः॥ वरुणनामानि॥ ॥ भयत्रस
ष्पा॥ श्रुविवकल्प॥ श्वसंत्यनेन श्वसनः॥ श्वस प्राणने॥ स्पृशतीति स्पर्शनः॥ स्पृश
संस्पर्शने॥ वातीति वायुः॥ वा गतिगंधनयोः॥ मातरि श्वा आकाशे श्वयति मातरिश्वा॥ स
दागतिर्यस्य सदागतिः॥ ॥मूलं॥ पृषदश्वो गंधवहो गंधवाहानिलाशुगाः॥ ॥टीका॥ १८

रोहिताश्वो वायुसखः शिखावानाशुशुक्षणिः॥ हिरण्यरेता हुतभुक् दहनो हव्यवा
हनः॥ ५५॥ रोहिताश्वोऽग्नेः॥ अश्वोस्य रोहिताश्वः॥ वायोः सखा वायुसखः॥ वायुः सखाय
स्येति॥ शिखास्यास्तीति शिखावान्॥ आशु शोषतीति आशुशुक्षणिः॥ हिरण्यं रेतोस्य हिरण्य
रेताः॥ हुतं भुंक्ते हुतभुक्॥ भुज पालनाभ्यवहारयोः॥ दहतीति दहनः॥ दह भस्मीकरणे॥ हव्ये
हव्यविषये वाहनेयतते हव्यवाहनः॥ हव्यं वहतीति वा॥ वह प्रापणे॥ ॥मूलं॥ सप्तार्चिर्दमु
नाः शुक्रश्चित्रभानुर्विभावसुः॥ शुचिरप्पित्तमौर्वस्तु वाडवो वडवानलः॥ ५६॥ टीका॥ स
प्तार्चिर्विषयस्यास्ति सप्तार्चिः॥ दाम्यति ग्लापयति दमुनाः॥ दमउपशमे॥ शोचयति शुक्रः
शुक्रः॥ शुच शोके॥ शुचं राति वा॥ रा दाने॥ शुक्रं रेतोऽस्यास्तीति वा॥ चित्रा भानवो यस्य चि
त्रभानुः॥ विभा वसु धनमस्येति विभावसुः॥ शुचतेश्चि॥ शुच शोके॥ शुचनात्॥ अपांपि
त्तमपित्तं॥ एतान्यग्निनामानि॥ उर्वतीति उर्वी॥ उर्वी तुर्वी धुर्वी हिंसायां॥ तस्यापत्यं और्वः॥

र्वदेहस्थवायुनामानि ॥ ५ ॥ मूलं ॥ हृदि प्राणो गुदेपानः समानो नाभिसंस्थितः ॥ उदा
नः कंठदेशस्यव्यानः सर्वशरीरगः ॥ ६३ ॥ शरीरस्थायमे रंहस्तरसी तु रयस्पदः ॥
जवोथ शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतं ॥ ६४ ॥ टीका ॥ रंहति सततं तरंहः ॥ रंहि गतौ ॥
तरस्यनेन तरः ॥ तॄ प्लवनतरणयोः ॥ रयते नेन रयः ॥ रय गतौ ॥ स्यंदनेन स्पंदः ॥ स्यंदु
प्रस्रवणे ॥ जवत्यनेन जवः ॥ जुङ् गतौ ॥ जवेन गतिनामानि ॥ शीघ्रते नेन शीघ्रं ॥ शीघ्र
व्याप्तौ ॥ त्वरत्यनेन त्वरितं ॥ ञित्वरा संभ्रमे ॥ लंघते नेन लघु ॥ अघि लघि गत्याक्षेपे ॥ क्षि
प्यते नेन क्षिप्रं ॥ क्षिप प्रेरणे ॥ अरमित्यव्ययं ॥ द्रवति स्म द्रुतं ॥ ॥ मूलं ॥ सत्वरं चपलं तूर्ण
मविलंबितमाशु च ॥ सततानारताश्रांतसंततविरतानिशं ॥ ६५ ॥ टीका ॥ त्वरया स
ह वर्त्तते सत्वरं ॥ चपत्यनेन चपलं ॥ चप मंदायां गतौ ॥ त्वरते तूर्णं ॥ तुर त्वरणे ॥ न विलं
बितं स्म ॥ अविलंबितं ॥ लंब आलंबने ॥ अश्नुते आशु ॥ अशू व्याप्तौ ॥ वेगमात्रनामा

पृषदाख्योमृगोऽश्वोयस्यपृषदश्वः॥पृषतांबिंदुनामश्वइतिवा॥गंधस्यवाहोगंध
वाहः॥गंधंवहतीतिवा॥गंधंवहतीतिगंधवाहः॥वहत्याप्यले॥अनत्यनेनअनिलः॥
अनप्राणने॥आशुगच्छत्याशुगः॥सम्यकूईरतेसमीरः॥समीरणः॥ईरगतौ॥अने
नकुपितेनम्रीयंतेमारुतः॥मरुच्च॥जगत्यंप्राणोजगत्प्राणः॥नभस्वान्॥नभस्वद्वात
पवनपवमानप्रभंजनाः॥प्राणोपानसमानश्चोदानव्यानौचवायवः॥६२॥टीका
नभः अस्यास्तिनभस्वान्॥वातिवातः॥पवतेपवनः॥पवमानश्च॥पवगतौ॥पुनीते
वापवमानः॥पुञ्पवने॥प्रभनक्तिशाखादिकंप्रभंजनः॥भंजआमर्दने॥वायुनामा
नि॥प्रकर्षेणबहिरानयतिप्राणः॥अधोनयतिअपानः॥सर्वत्रनयतिसमानः॥उ
तऊर्ध्वमानयतिउदानः॥व्यानयतिव्यानः॥शरीरगापरेण॥प्राणिति॥अपानिति॥समा
निति॥उदानिति॥व्यानिति॥वायय्यात्रमेवंवक्तव्यं॥एतेपंचक्रमेणहृद्गुदनाभिकंठस

नि॥ संतन्यतेसंततं॥ सततंच॥ नविद्यतेआरतंनिरामोत्र अनारतं॥ अविरतं॥ अनवरतंच
नश्यामस्यमितिअश्रांतं॥ श्रमुतपसिखेदेच॥ नास्तिनिशा निनिलितिरत्रनिशो॥ अस्त्रं॥
निसानवरताजस्त्रमप्यथातिशयोभरः॥ अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरं॥
६६॥ टीका॥ नियततंतत्तवंनित्यं॥ अजत्यजस्त्रं॥ जसुउपक्षये॥ अविछितिनामा॥ नि॥
अतिशेतेजयत्यनेनातिशयः॥ भरतिभरः॥ भृङ् भरणे॥ वेलामतिक्रांतमतिवेलं॥ बि
भर्त्तिभृशं॥ अर्थमतिक्रांतमत्यर्थं॥ मात्रमतिक्रांतमतिमात्रं॥ उद्गाहतेप्रादुर्भवत्यु
द्गाढः॥ गाढविलोडने॥ निःशेषेः सर्वतोभारोत्र निर्भरं॥ अस्त्रं॥ तीव्रैकांतनितांता
निगाढबाढदृढानिच॥ क्लीबेशीघ्राद्यसत्वेस्यात्रिष्वेषांसत्वगामियत्॥ ६७॥ टीका॥
तीव्रतितीव्रं॥ तीव्रस्थौल्ये॥ एकोनिश्चितोंतः एकांतः॥ नितरांताम्यतिनितांतं॥ तमुग्ला
नौ॥ गाढतेगाढं॥ गाढीप्रयत्नेवाढ्यतेवाढः॥ बाढ्प्रयत्ने॥ दृढतिदृढं॥ दृढवृद्धौ॥ अति

अथ नामानि ॥ क्लीबे शीघ्राद्यसत्वे स्यात् ॥ शीघ्रादि दृष्टांताः शब्दाः ॥ सत्वे क्रियाविशे
षणत्वे गुणवृत्तित्वेपि नपुंसकलिंगाः ॥ क्रियाविशेषणत्वे यथा ॥ शीघ्रं भुंक्ते शीघ्रं प
चति ॥ सततं गच्छति ॥ क्षिप्रं करोतीत्यादौ ॥ गुणवृत्तित्वे यथा ॥ अस्य शीघ्रं तु लघु त्व
घु इत्यादि ॥ अत्र जातिशयभर शब्दो गुणवृत्तित्वेपि पुल्लिंगो ॥ यथा ॥ धस्यातिशयः पु
ण्यानामित्यादिति क्रियाविशेषणत्वे तु शीघ्रादिवन्नपुंसकलिंगा नेव ॥ यथा अतिश
यं सुभ्रं ॥ भरं तिष्ठतीत्यादि ॥ त्रिष्वेषां सत्वगामि यत् ॥ येषां शीघ्रादिपदानां अभिधेयं स
त्वगामि विशेषगामि तत्र त्रिषु लिंगेषु भवति ॥ यथा शीघ्रोश्वः क्षिप्रास्त्वराः सततं ॥
लघु त्सु ष्पति इत्यादि ॥ ॥ मस्त्वं ॥ कुबेरस्त्र्यंबकसखो यक्षराड् गुह्यकेश्वरः ॥ मनुष्य २०
धर्मा धनदो राजराजो धनाधिपः ॥ ६८ ॥ टीका ॥ कुत्सितं बेरं शरीरं यस्य कुबेरः ॥ त्र्यं
बकस्य सखा त्र्यंबकसखः ॥ यक्षेषु राजते यक्षराट् ॥ राजृ दीप्तौ ॥ गुह्यकानामीश्व

कैलासः ॥ कुबेरस्थाननाम ॥ पुष्पमिव पुष्पकं ॥ कुबेरविमाननामानि ॥ मूलं ॥ स्यात्किं
न्नरः किंपुरुषस्तुरंगवदनो मयुः ॥ निधिर्ना शेवधिर्भेदाः पद्मशंखादयो निधेः ॥
टीका ॥ किंचिन्नरः किंनरः ॥ किंपुरुषश्च ॥ कुत्सितो नरो वा ॥ तुरंगस्येव वदनमस्य तुरंगव
दनः ॥ मयते विनिमयते मयुः ॥ मयगतौ ॥ किंनरनामानि ॥ निधीयते त्र निधिः ॥ शेवसौख्यं
धनं तद्धीयते त्र शेवधिः ॥ निधिनामनी ॥ मूलं ॥ महापद्मश्च पद्मश्च शंखो मकरकच्छ
पौ ॥ मुकुंदकुंदनीलाश्च खर्वश्च निधयो नव ॥ ७३ ॥ टीका ॥ महांश्चासौ पद्मश्च म
हापद्मः ॥ पद्यते पद्मः ॥ पद सेवायां ॥ शामयति दुःखं शंखः ॥ शाम उपरमे ॥ शं सुखं ख
नति जनयतीति वा ॥ खनु अवदारणे ॥ जननार्थे च ॥ मकरवत् गृह्णीतुं न शाक्यत्वात् म
करः ॥ कूर्म इव स्थितत्वात् कच्छपः ॥ कमनीयत्वात् मुकुंदः ॥ कुंदश्च नितरां मीयते नीलः ॥ ई
उ स्तुतौ ॥ चर्वा च अध्ययने ॥ एतानि नव निधिनामानि ॥ ॥ इति श्रीवंगलकाभेयभट्टोपाध्या

यस्तनुलिंगाख्य सत्सूरि विरचितायाममरकोशपदविवृत्तौ स्वर्गवर्गोक्तनामलिंगविवेच
नं ॥ ॥ ७ ॥ मूलं ॥ द्योदिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमंबरं ॥ नभोंतरिक्षं गगनमनंतं सुरव
र्त्म खं ॥ १ ॥ टीका ॥ दिव्यति द्योः ॥ द्योश्च नभा जते अभ्रं ॥ भ्राजृ दीप्तौ ॥ विशेषेण अवति
अवकाशदानेन व्योम ॥ अव रक्षणे ॥ पुष्णाति पुष्करं ॥ पुष पुष्टौ ॥ पुष्करमुत्करातिवा
रादाने ॥ शब्दायते अंबरं ॥ अंबि शब्दे ॥ मेघैर्न भातिनभा ॥ नभ दीप्तौ ॥ अंतः ऋक्षाणि यत्र
संति अंतरिक्षं ॥ गछंत्यत्र खगाः गगनं ॥ न विद्यते अंतो यस्य अनंतं ॥ सुराणां वर्त्म सुर
वर्त्म ॥ खन्यते खं ॥ खनु अवदारणे ॥ जननार्थे च ॥ २ ॥ मूलं ॥ वियद्विष्णुपदं वापि पुंस्याका
शविहायसी ॥ विहायसोपि नाकोपि द्युरपि स्यात्तदव्ययं ॥ २ ॥ इति व्योमवर्गः ॥ ७ ॥
टीका ॥ वियच्छति न विरमति वियत् ॥ यम उपरमे ॥ विष्णोः पदं विष्णुपदं ॥ आसमंतात्का
शते त्र सूर्यादयो त्र आकाशः ॥ काशृ दीप्तौ ॥ विजिहायते सर्वं विहाय ॥ ओहाक् त्यागे ॥ विहा

डुङ्ग तावितिवाधातुः॥ आकाशनामानि॥ इति व्योमवर्गः॥ मूलं॥ दिशस्तु ककु
भः काष्ठा आशाश्च हरितश्च ताः॥ प्राच्यवाचीप्रतीच्यस्ताः पूर्वदक्षिणपश्चिमाः॥ १
यं टीका प्राचीं दक्षिणेयमितिदिश्यते दिक् दिश अतिसर्जने कं वायुं कस्नाति
क कुक् स्कम्भ विस्तारे काशतेकाष्ठा काश्दीप्तौ अश्नुते आशा अश्नु व्याप्तौ
हरतिजनं यमं प्रतीति हरित् हृञ् हरणे दिशानामानि प्रांचतिसूर्यः प्राची आवा
चतिदक्षिणे अवाची अपाचीतिवा पाठः पश्चादंचतिसूर्योस्तमतिप्रतीची उत्त
रमंचतिसूर्य उत्तरायणइत्युदीची अंचुगतिपूजनयोः एतानिपञ्चक्रमं पूर्वद
क्षिणपश्चिमोत्तरनामानि इतरः दिक्कुम्यः आद्यापूर्वा स्त्रते वर्धतइतिदक्षिणा २२
दक्षश्च द्वौशीघ्रार्थे च पश्चादुद्भवापश्चिमा १ मूलं उत्तरादिगुदीचीस्या
द्दिश्यंतु त्रिषुदिग्भवेत् इंद्रोवह्निः पितृपतिर्नैऋतोवरुणोमरुत् २ टीका

रः गुह्यकेश्वरः॥ मनुष्यस्येव धर्मोयस्य मनुष्यधर्मा॥ धनंददातिधनदः॥ देश्वरलक्षणे॥ राज्ञां
राजा॥ राजराजः॥ धनस्य अधिपो धनाधिपः॥ मूलं॥ किंनरेशोवैश्रवणःपौलस्त्योनर
वाहनः॥ यक्षैकपिंगैलविलश्रीदपुण्यजनेश्वरः॥ ६९॥ टीका॥ किंनराणामीशः किं
नरेशः॥ विश्रवसोपत्यंपुमान् वैश्रवणः॥ पुलस्त्यस्यापत्यंपौलस्त्यो नरवाहनः॥ पुलस्त्य
पत्यमितिवा॥ नरवाहनमस्यनरवाहनः॥ यक्षजातित्वाद्यक्षः॥ एकनेत्रंपिंगलंयस्य ए
कपिंगलः॥ इलविलायाअपत्यएलाविलः॥ श्रियंददाति श्रीदः॥ पुण्यजनानामीश्व
रः॥ पुण्यजनेश्वरः॥ मूलं॥ अस्योद्यानंचैत्ररथंपुत्रस्तुनलकूबरः॥ कैलासस्थानम
लकापूर्विमानंतुपुष्पकं॥ ७०॥ टीका॥ कुबेरनामानि॥ चित्ररथेनगंधर्वेणनिर्मितं
चैत्ररथं॥ कुबेरोद्याननाम॥ नलइवयमइवकूबरस्यास्तिनलकूबरः॥ नलस्येवकू
बरोरथावयवोस्येतिवा॥ कुबेरपुत्रनाम॥ केशिरसिनयोर्लालिसंनत्वंतदस्यास्ति

ताम्रपर्णीसुभ्रदंतीचांगनाचांजनावती ४ टीका अभ्रेषुमातिवर्त्ततिअभ्रमुः मा
मानेवर्त्तमानेच नभ्राम्यतिस्त्रवभंजितोकेचिन्नभ्रमतिअभ्रमुः भ्रमुचलने काम्य
तइतिकपिला कमुकांतौ कपिलवर्णत्वात् पिंगलवर्णोस्यास्तिपिंगला नविद्य
तेउपमायस्याःसाअनुपमा ताम्रवर्णरवोपधिसादृचर्यात्ताम्रपर्णी शोभनोदंतो
यस्याःसासुदंती शोभनान्यंगानियस्याःसाअंगना अंजनाकारवर्णोस्याअस्यअंज
नावती ऐरावतादिदिग्गजभार्यानामानि मूलं क्लीबेव्ययंत्वपदिशंदिशोर्मध्ये
विदिक्स्त्रियां अभ्यंतरंत्वंतरालंचक्रवालंतुमंडलं ५ टीका द्विशोदिशमपदिशं
विदिशाविदिक् विदिक् दिङ्मध्यनामानि अभ्यंस्यतेअभ्यादिरत्न अभ्यंतरं अतिबंध
ने अंतरमालातिअंतरालं स्यादाने असदिगादेरभ्यंतरनामानि चक्राकारेण
वालंतेवर्त्ततिचक्रवालं वालव्याख्याप्ये दिङ्मंडलनाम मूलं अभ्रंमेघोवारिवा

हस्तनयित्नुर्बलाहकः धाराधरोजलधरस्तडित्वान्वारिदोबुभृत् ६ टीका अभ्रतिगछ
त्यभ्रं अभ्रगतौ मेहतिमेघः मिहसेचने वारिवहतिवारिवाहः वदप्रापणे स्तनयति
स्तनयित्नुः स्तनशब्देनशब्दे बहुलमुदकंयस्यास्तिबलाहकः धाराणांधरोधारा
धरः जलस्यधरोजलधरः तडितोचसंतितडित्वान् वारिंददातिवारिदः डुदादाने
अंबुबिभर्तिबुभृत् भृञ्भरणे मूलं घनजीमूतमुदिरजलमुग्धूम
योनयः कादंबिनीमेघमालात्रिषुमेघभवेभ्रियं ७ टीका वायुनाहन्यतेघनः
हनदिंसागत्योः जीवनमुदकंमूयतेजीमूतः मुचरबंधने मोदयतेकृषीवलानमु
दिरः मुदहर्षे जलमुंचतिजलमुक् मुचिस्त्रमोक्षणे धूमोयोनिर्यस्यधूमयोनिः
मेघनामानि कमुदकंआदत्तेकादंबामेघास्तस्यासंतिकादंबिनी कादंबाःक
लहंसाःअस्यांसंतिवा कादंबाअम्लंत्यत्रेतिवा मेघमालानाम अभ्रेभवमभ्रियं

मेघभवस्यादेर्नाम मूलं स्तनितंगर्जितंघोषनिर्घोषौरसितादिच शंपाशतह्रदा
ह्रादिन्यैरावतीक्षणप्रभा ८ टीका स्तनतिस्तनितं स्तनगदद्देवशब्दे गर्जतिगर्जितं
गर्जशब्दे रसतिरसितं रसशब्दे मेघनिर्घोषनामानि कृषीवलानांदुःखंशमयति
शंपा शमउपशमने कर्षकाणांशंसुखंपातिवा पारक्षणे समंतात्पातिवासंपाइ
तिवापाठे शतधाह्रादयतिशतह्रदा ह्राद अव्यक्तेशब्दे ह्रादतेह्रादिनी ह्रादुनीति
वापाठः इरावतीमेघभवाऐरावती क्षणंप्रभायस्याःसाक्षणप्रभा मूलं तडित्सौ
दामिनीविद्युच्चंचलाचपलाअपि स्फूर्जतिर्वज्रनिर्घोषोमेघज्योतिरिरंमदः ९
टीका ताडयतितडित् तडआघाते सुदामाख्याद्रिणासहवर्त्ततेसौदामिनी सुदा
मवद्दीर्घाकारोस्येतिवा विद्योततइतिविद्युत् द्युतिदीप्तौ चंचतिचंचला चंचगतौ २४
चोपतिचपला चुपमंदायांगतौ विद्युन्नामानि स्फूर्जतिस्फूर्जथुः अथस्फूर्जोवज्र

उत्तरतिमेर्वादिभूम्याइत्युत्तरा त्वन्नक्षत्रवनंतरणयोः दिशिदिशिभवंतिदिश्यं एतद्दिग्भव
स्यइंद्रादेर्नाम इंद्रः वह्निः पितृपतिः नैर्ऋतः वरुणः मरुत् कुबेरः ईशः इति
पूर्वादीनांदिशांपतयः मूलं ऐरावतःपुंडरीकोवामनःकुमुदोंजनः पुष्पदं
तःसार्वभौमःसुप्रतीकश्चदिग्गजाः ३ टीका इरावतीसमुद्रजातेरा [illegible] पुंडरीक
वर्णत्वात्पुंडरीकः पुणतिवा पुण शुभकर्मणि वायुमात्मानंमन्यते वामनः मन
ज्ञाने वामवत्सुशरीरमस्यवावामनः वामत्वाद्वा कुमुदवर्णत्वाद्वाकुमुदः कुं
पृथिवीमोदयतिवा मुदहर्षे अंजनाभत्वादंजनः अनक्तिगच्छतीतिवा अंजुव्य
क्तिम्रक्षणकांतिगतिषु पुष्प्यतिपुष्पं पुष्पविकसने पुष्पवद्दंतौयस्यपुष्पदंतः स
र्वभूम्यांविदितःसार्वभौमः शोभनाःप्रतीकाअवयवायस्यसुप्रतीकः यथाक्रमे
णाष्टदिग्गजानामानि ३ मूल किरणोभ्रमकपिलापिंगलानुपमाक्रमात्

कीर्यतेवायुनाभ्रमानितिवा कविक्षेपे वर्षशिलानाम दुष्टंदिनंदुर्दिनं मेघछन्नाहोरा
त्रनाम मूलं अंतर्द्धाव्यवधापुंसित्वंतर्द्धिरपवारणं अपिधानतिरोधानपिधा
नाछादनानिच १२ टीका अंतर्द्धीयतेअनयाअंतर्द्धाः व्यवधा अंतर्द्धिः डुधाञ्‌धा
रणपोषणयोः अपव्रीयतेअपवारणं वृञ्‌वरणे अपिदधातिपिधानं त्रिरोदधा
तितिरोधानं पिधानंच आछादयतिआछादनं छदुअपवारणे मेघाद्यैश्चंद्रादेर
तर्धाननामानि मूलं हिमांशुश्चंद्रमाश्चंद्र इंदुःकुमुदबांधवः विधुःसुधांशुः
शुभ्रांशुरोषधीशोनिशापतिः १३ टीका हिमाःअंशवोयस्यहिमांशुः चंद्रेणक
र्पूरेणउपमीयतेचंद्रमाः माङ्‌माने चंदतिचंद्रः चदिआल्हादने तुषारकिरणे
रुणत्तिइंदुः उंदीक्लेदने कुमुदानांकुमुदबांधवः देवाएनंविशेषेणधयंतिविधुः
ट धेट्‌पाने सुधारूपाअंशवोयस्यसुधांशुः शुभ्रांशुः ओषधीशः निशायाःपतिःनि

शीपतिः मूलं अब्जोजैवातृकःसोमोग्लौर्मृगांकःकलानिधिः द्विजराजःशशिधरो
नक्षत्रेशःक्षपाकरः १४ टीका अप्सुजातःअब्जः जीवयतिजैवातृकः जीवप्राणधा
रणे सौतिअमृतंसोमः सुषुप्रसवैश्वर्ययोः ग्लापयतिसाम्प्रतइतिग्लौः ग्लैम्लै हर्ष
क्षये मृगःअंकोयस्यमृगांकः कलानांनिधिःकलानिधिः द्विजानांराजाद्विजराजः
शशस्यधरःशशधरः नक्षत्राणामीशोनक्षत्रेशः क्षपांकरोतिक्षपाकरः चंद्रनामानि
मूलं कलातुषोडशोभागोबिंबोस्त्रीमंडलंत्रिषु भित्तंशकलखंडेवापुंस्यर्द्धोर्द्धस
मेंशके १५ कलयतिसंख्यातिकला कलसंख्याने चंद्रस्यषोडशांशनाम बिंबतिवि
स्तारंप्राप्नोतिबिंबः बिबिआभोगे मंडतिव्याप्नोतिमंडलं मडिभूषायांव्याप्तौच चंद्र
सूर्यादिमंडलनामनी भिद्यतइतिभित्तं भिदरविदारणे शक्यतेशकलं भेत्तुमिति
शकलं शकलशक्तौ खंडतिखंडं खडिभेदने अर्धंव्याप्नोतिभेदंगच्छति अर्धः अ

गतो शकलनामानि अर्धसमांशनाम मूलं चंद्रिकाकौमुदीज्योत्स्नाप्रसादस्तुप्र
निषेधादिनर्त्तकपुरुषनामानि। नाट्योक्तौ नाट्यव्यवहारे नामान्याहुः॥ अर्जने अर्जुका।
अर्जसर्जने। नाट्योक्तौ गणिकानाम॥१२॥ भगिनीपतिरावुत्तो भावो विद्वानथावुकः॥ ज
नको युवराजस्तु कुमारो भर्त्तृदारकः॥१३॥ नान्यत्र अवति भगिनी भावुकः। भगिनीपति
नाम। भवति भावः। विदुषो नाम। अवति आवुकः। अवरक्षणे। जनकनाम। कुत्सितं मार
यति कुमारः। मृङ् प्राणत्यागे। भ्योष्यान् दारान् बिभर्त्ति भर्त्तृदारकः। मृङ् भरणे। युवरा
जनामानि॥१४॥ राजा भट्टारको देवः तत्सुता भर्त्तृदारिका॥ देवी कृताभिषेकायामितरासु च

भट्टिनी॥१५॥ भट्टंति अरतेरु तं भाषंते भट्टाः। भट्टिपरिभाषणे। भट्टाश्च ते आरश्च आरेति भट्टा
रकः। अत्र पीडने। दीव्यति देवः। दिवु क्रीडायां। राजनामानि। भर्त्तृदारचौ केंद्ववत्। राजपु
त्रीनाम। दीव्यती देवी। अभिषिक्तराजपत्नीनाम। भट्टिनी। अकृताभिषेकराजमहिषीनाम।
अब्रह्मण्यमवध्योक्तौ राजस्यालस्तु राष्ट्रियः॥ अंबा माताथ बाला स्याद्वासूरार्यस्तु मारि
षः॥१६॥ ब्रह्मण्यं अवध्य इत्युक्तिरत्र अब्रह्मण्यं। अवध्योक्तिनाम। राष्ट्रं राज्ञीतस्या भ्रातार
ष्ट्रियः। राजपत्नीभ्रातृनाम। अंबयते शब्दयते वा। अंबा। अंबि शब्दे। मातृनाम। वसति मातुः स
मीपे वासः। बालनाम। मायामियर्त्ति मारिषः। ऋ गतौ। आर्यनाम॥१७॥ अत्तिका भगि
नी ज्येष्ठा निष्ठा निर्वहणे समे॥ हंडे हंजे हलाह्वाने नीचां चेटीं सखीं प्रति॥१८॥ अतिभ्रातृ
जायो वचने रित्यत्तिका। अद भक्षणे। ज्येष्ठभगिनीनाम। नियतिस्थानं निष्ठा। निःशेषेण व
हनं समाप्तिः निर्वहणं। समे समस्थाने नाटकस्य निर्वहणस्य पंचमसंधिनामनी। संगीतशा

स्ते पंचमसंधिसमय इत्युच्यते। हंडे नीचानामा। हंजे चेटीनामा। हला सखीनामा॥१५॥ नाट्यो
क्तयः समाप्ताः॥ ॥ अंगहारोंगविक्षेपव्यंजकाभिनयौ समौ॥ निर्वृत्ते त्वंगसत्वाभ्यां द्वे त्रिष्वा
गिकसात्विके॥१६॥ अंगानां हारः अन्यत्र नयनं अंगहारः। अंगानां विक्षेपः अंगविक्षेपः। स्था
नस्थानांतरक्रिया नामनी॥ व्यनक्ति अर्थं व्यंजकः। अनुव्यक्तिस्तस्य कांतिगतिषु॥ अभिमु
खेन नीयते तेन अर्थः अभिनयः। नीञ् प्रापणे। वाचिकांगिकसात्विकाख्यभावसूचकनामनी॥
अंगेन निर्वृत्तं आंगिकां। सत्वेन निर्वृत्तं सात्विकं। सत्वोत्कटे मनसि पुलकिताद्यभिनयनाम
नी॥१६॥ शृंगारवीरकरुणाद्भुतहास्यभयानकाः॥ बीभत्सरौद्रौ च रसाः शृंगारः शुचिरुज्ज
लः॥१७॥ शृंगारः। वीरः। करुणः। अद्भुतः। हास्यः। भयानकः। बीभत्सः। रौद्रः। चकाराच्छांति ५४
श्च। एते शृंगारादयो नवरसा भवंति॥ सामाजिकजनेन रस्यंते रसाः। रस आस्वादने। के ते रसाः
शृंग युवादिकं युवादिकमियर्ति शृंगारः। ऋ गतौ। जुगुप्सादिरहितत्वात् शुचिः। उज्ज्वलतिस्मका

वधिसेयमने। तत्रीबंधस्थाननामनी॥७॥ मर्दलः पणवोन्ये च नर्तकीलासके समे॥ शब्द
नियर्ति डमरुः। ऋ गतौ। मडुरुच्चारणमडुः। डिंडि इति शब्दं करोति डिंडिमः। झर्झर इति शब्दं
करोति झर्झरः। मर्दते मर्दलः। मर्द क्षोदे। पणायते स्तूयते पणवः। एते च अन्ये वाद्यप्रभेदाः
नृत्यती नर्तकी। नृती गात्रविक्षेपे। लसति लासकी। लस श्लेषक्रीडनयोः। नृत्यकारणी
नामनी॥८॥ विलंबितं द्रुतं मध्यं तत्त्वमोघो घनं क्रमात्॥ तालः कालः क्रियामानं लयस्सा
म्यमथास्त्रियां॥९॥ विलंबितं द्रुतं मध्यं एते क्रमात्। तत्त्वमोघः घन इति त्रिनामानि॥ तत्तंति लय
गीतवाद्यनृत्तानि तिष्ठंत्यत्र तालः॥ तल प्रतिष्ठितायां॥ मेघायाः परिच्छेदकनामा। लीयते
त्र लयः। लीङ् श्लेषणे। न्यूनाधिकरहिततालसाम्यनाम॥१०॥ तांडवं नटनं नाट्यं ला
स्यं नृत्यं च नर्तने॥ तौर्यत्रिकं नृत्यगीतवाद्यं नाट्यमिदं त्रयं॥११॥ तंडुना शिवेनोपदिष्ट
तांडवं॥ उचितप्रयोगनर्तननामा। नटस्य कर्म नाट्यं। नाट्यते नेन नाट्यं। नट नृत्तौ। न

द्वे चित्रे। चित्रयति अकस्माच्चित्रं। चित्रीङ् आश्चर्ये। अद्भुतरसनामानि। बिभेति अस्मा
द्धीरत इति भैरवं ॥१९॥ दारुणं भीषणं भीष्मं घोरं भीमं भयानकं ॥ भयंकरं प्रतिभयं
रौद्रं तूग्रमभी त्रिषु ॥२०॥ भीषयतेऽस्मात् भीषणं। भीष्मं। भीमं। भयानकं। ञिभी भये। भयंकरोति भयंक
रं। भा। दुःखं अकरणे। दारयति दारुणं। दृ भये। घुरति इतस्ततो घोरं। घुर भीमार्थशब्द
योः। भयरसनामानि। रुजं रोगं ददाति रुद्रः। तस्य कर्म रौद्रं। उग्रत्वादुग्रं। रौद्ररसनाम
चतुर्दश नि। अमी अद्भुताद्या उग्रतांतास्त्रिषु लिंगेषु वर्त्तंते ॥२०॥ चतुर्दश दरस्त्रासो भीतिर्भीः स्या
ध्व संभयं ॥ विकारो मानसो भावोऽनुभावो भावबोधकः ॥२१॥ दरति बिभेति अस्मादिति द
रः। ञिभी भये। त्रस्यत्यस्मादिति त्रासः। त्रसी उद्वेजने। बिभेति अस्याः भीतिः। भीश्च। भयं ञिभी
भये। साधु नस्यति बाधयति साध्वसं। असु क्षेपणे। भयनामानि। भावयति मानो भावः। अनु ५५
वा अवकल्कने। हर्षोन्मादः श्रमाशंका निर्वेदो जडता धृतिः ॥ ग्लानिश्चिंता मतिर्व्रीडा दैन्य

वर्गस्मृतिर्दमः ॥ गर्दोपस्मारसुप्ताश्च चपलालस्यमुग्रता ॥ अमर्षस्त्रासतर्काश्च निद्रोत्सु
क्यं मतिस्तथा ॥ आवेगो व्याधिरीर्ष्या च विषादश्चातिकंपनं ॥ अवबोध इति प्रोक्ता भावाः संचा
रिणो बुधैः ॥ मनोविकारनामानि। येन अनुभावयति इत्यनुभवः ॥ भुवो अवकल्कने। मनोविका
रज्ञापकहेतुनाम ॥ नानांगाभिनयेनेदं यस्मादर्थोऽनुभाव्यते ॥ शाखांगोपांगसंहितः सोऽनु
भावास्ततस्मृता इति ॥ भ्रूविभंगकटाक्षाद्या अनुभाव्या इति स्मृताः ॥२१॥ गर्वोऽभिमानोऽहं
कारो मानश्चित्तसमुन्नतिः ॥ अनादरः परिभवः परिभावस्तिरस्क्रिया ॥२२॥ गर्वत्यनेन गर्वः।
खर्व गर्व दर्पे। आत्मानं ज्ञापयति अभिमनुते अभिमानः। मनु अवबोधने। अहमेव ज्ञाया
निति करोति अहंकारः। आत्मानमेव मानयति मानः। मान पूजायां। चित्तस्य समुन्नतिः
चित्तसमुन्नतिः। अहमेव ज्ञायानीति मननं नामानि। न द्रियते अनादरः। दृङ् आदरे। प
रिभूयते परिभवः ॥ परीभावश्च ॥ भू सत्तायां ॥ तिरस्करोतीति तिरस्क्रिया ॥२२॥ रीढावमा

नावज्ञा[illegible]हेलनमसूक्षणं॥ मं[illegible]ह्रीस्त्रपाव्रीडालज्जासापत्रपान्यतः॥२३॥रिङ्
तिक्षय[illegible]ढा॥ अवज्ञायतेनया अवज्ञा॥ ज्ञा अवबोधने॥ अवहेलनमिति अवहेलनं हे
लनं अनादरे॥ असूक्षणमिति असूक्षणं॥ अवहेलनंमसूक्षणं इतिवापाठः॥ रुक्षा अनाद
रे॥ तिरस्क्रियानाम नि॥ मंदमक्षियत्र मंदाक्षं॥ मंदमक्षमिंद्रियमत्रेतिवा॥ जी ह्रीतिअनया ह्री॥
ह्री लज्जायां॥ त्रपतित्रपा॥ त्रपुष् लज्जायां॥ व्रीडतिव्रीडा॥ व्रीड चोदने॥ व्रीडा॥ उदाहृतयोः॥ लज्ज
ते लज्जा॥ ओलजी व्रीडे॥ लज्जानामानि॥ अपत्रपति अपत्रपा॥ त्रपुष् लज्जायां॥ परादागत
ह्रीनाम॥२३॥ क्षांतिः स्तितिक्षाभिध्यातु परस्य विषये स्पृहा॥ अक्षांतिरीर्षासूयातु दोषा
रोपो गुणेष्वपि॥२४॥ क्षम्यते क्षांतिः॥ क्षमुष् सहने॥ मर्षणनामनी॥ अभिध्यायते अभि
ध्या॥ ध्यै चिंतायां॥ परद्रव्यलिप्सानाम॥ ईर्ष्यतिईर्ष्या॥ षुर्द्दू ईर्ष्या॥ ईर्ष्योर्य अक्षमानाम॥
असूयत इत्यसूया॥ गुणेषु दोषारोपणनाम॥२४॥ वैरं विरोधो विद्वेषो मन्युशोकौ ५८

शते उज्वलः॥ ज्वल दीप्तौ॥ शृंगाररसनामानि॥१७॥ उत्साहवर्धनो वीरः कारुण्यं क
रुणा घृणा॥ कृपा दयानुकंपा स्यादनुक्रोशोप्यथो हसः॥१८॥ विरुद्धान् द्यतिवीरः॥ द
ने छेदने॥ विद्विषामीरयतिवीरः॥ वीर प्रेरणे॥ वीररसनाम॥ करुः क्लेशंनुसरतेकरुणा
करुणैव कारुण्यं॥ घृण्यतेनया घृणा॥ घृणि ग्रहणे॥ घृणि दीप्तावितिवाधातुः॥ कप
यते कृपा॥ कृपत् कृपायां॥ दयतेरक्षंतेनयादया॥ दय दानगतिरक्षणेषु॥ अनुकंपतिअ
नुकंपा॥ कपि चलने॥ अनुक्रोशत्यनेन अनुक्रोशः॥ क्रुश आह्वाने रोदने च॥ कारु
ण्यरसनामानि॥ जनान् हासयति हासः॥१८॥ हासो हासंचाबीभत्सं विकृतं त्रिष्विद
दयं॥ विस्मयोद्भुतमाश्चर्यं चित्रमप्यथ भैरवं॥१९॥ हसनं हास्यं॥ हसे हसने॥
हास्यरसनामानि॥ बीभत्सान्नास्ति बीभत्सः॥ अविरुद्धत्वाद्विकृतो॥ बीभत्सरसनाम॥ वि
स्मापयति विस्मयः॥ स्मिङ् ईषद्धसने॥ आश्चर्यमाश्चर्य इतिवा साधुन अदतीत्यद्भुतो अ

रथः॥२७॥ प्रियस्य भावः प्रेमा॥ प्रेम च॥ प्रियता च॥ हृदयकर्म हार्दं॥ स्निह्यते नस्नेहः॥ ष्णिह
प्रीतौ॥ स्नेहनामानि॥ दोग्धि अनेन दोहदं॥ इछति यया इछा॥ इषु इछायां॥ कांक्षते का
क्षा॥ कांक्षि इछायां॥ स्पृहति स्पृहा॥ स्पृह इछायां॥ ईहते ईहा॥ ईह चेष्टायां॥ तृष्यति यया
तृट्॥ तर्षश्च॥ तृष पिपासायां॥ वांछति वांछा॥ वांछि इछायां॥ लुब्धुमिछा लिप्सा॥ मनोर
थोयस्य मनोरथः॥२७॥ कामोभिलाषस्तर्षश्च समौ लालसा द्वयोः॥ उपाधिर्नाध
र्मचिंतापुंस्याधिर्मानसी व्यथा॥२८॥ कम्यते कामः॥ कमु कांतौ॥ अभिलषति येन अभिला
षः॥ लष्य लष इस्पृहादि॥ इछानामानि॥ लस्यते लालसा॥ लस श्लेषक्रीडनयोः॥ भृषतराभि
लाषनामानि॥ उपसमीपे आधीयते धर्मो त्रेत्युपाधिः॥ धर्मचिंतायानामा॥ आधीय ५७
ते देन्यमनेन आधीः॥ डुधाञ् धारणपोषणयोः॥ मनोव्यथानाम॥२८॥ स्याच्चिंता स्मृ
तिराध्यानमुत्कंठोत्कलिके समे॥ उत्साहोध्यवसायस्यात्सवीर्यमतिसक्तिभाक्॥२९॥

चिंत्यते चिंता॥ चिति चिंतायां॥ दारिद्र्यादि वितर्कनाम॥ स्मर्यते स्मृतिः॥ आस्मृति आध्याने॥
विस्मृतिस्मरणनाम॥ आसमंताध्यायते आध्यानं॥ ध्यै चिंतायां॥ उत्कंठात्मकस्मरण
नाम॥ केचित्त्रयः एकार्था इति भवंति॥ उत्कंठ्यते उत्कंठा॥ उत्कल्प्यते उत्कलिका॥ कल संख्या
ने॥ औत्सुक्यनामनी॥ उत्सहते उत्साहः॥ षह मर्षणे॥ व्यवसीयते व्यवसायः॥ प्रोक्तकर्म
णि॥ उद्योगनामनी॥ वीरस्य कर्म वीर्यं॥ अतिशक्तिसहितोद्योगनाम॥२९॥ कपटोस्त्री
व्याजदंभोपधयश्छद्म कैतवे॥ कुसृतिर्निकृतिः शाठ्यं प्रमादोनवधानता॥३०॥ के शि
रसि पटवच्छादकः कपटः॥ व्याजयति व्याजः॥ अज गतिक्षेपणयोः॥ दभ्नोति दिनस्ति अ
नेन दंभः॥ दंभु हिंसायां॥ उपसमीपे धीयते अनेन उपधीः॥ छाद्यते अनेन छद्म॥ छद अ
पवारणे॥ कितवस्य कर्म कैतवं॥ कपटनामानि॥ कुत्सितस्य सृति दिसा कुसृतिः॥ निकृ
ष्टकरणमिति निकृतिः॥ कृञ् हिंसायां॥ शठति शठः॥ शठ कैतवे॥ तस्य कर्म शाठ्यं॥ अनात्मक

व्यापारनामनी। प्रमाद्यतिप्रमादः। मदीहर्षग्लपनयोः। नविद्यतेऽवधानंयस्यअनवधा
नः तस्यभावः अनवधानता। चिकुलनामानि॥ ३०॥ कौतूहलंकौतुकंचकुतुकंचकुतूह
लं॥ स्त्रीणांविलासबिब्बोकौ विभ्रमाललितंतथा॥ ३१॥ कौतूहलं। कौतुकं। कुतुकं। कु
तूहलं। अनुभूताभीष्टाभिलाषनामानि। विलसतियेनविलासः। लसक्रीडायां। प्रियेआ
गतेसतिप्रियायाःगर्वादिनादरनाम। विशेषेणभ्रमतिविभ्रमः। भ्रमुअनवस्थाने। श्रृं
गाराधिक्याच्चित्तवृत्त्यनवस्थाननाम। ललतिललितं। लल्लविलासे। स्वविकल्पितसु
कुमारपत्नीअंगचेष्टितनाम॥ ३२॥ हेलालीलेत्यमीहावाक्रियाःश्रृंगारभावजाः॥
द्रवकेलिपरीहासाःक्रीडालीलाचनर्मच॥ ३३॥ हेलयतिहेला। हिलहावकरणे। ५८
हेलअनादरइतिवाधातुः। श्रृंगारप्रौढिनाम। लीला मनोमधुरवागंगचेष्टितेप्रिया
नुकरणनाम। स्त्रीणांश्रृंगारभावजाःक्रियाःअमीभावाउच्यंते। हूयंतेकामिनःरभि

तुष्टु [illegible]यां॥ पश्चात्तापोनुतापश्चविप्रतीसारइत्यपि॥ ३५॥ वीरस्यकर्मवैरं। विरुध्य
[illegible]इतिविरोधः रुधिरआवरणे। वि[illegible]षतिविद्वेषः। द्विषअप्रीतौ॥ वैरनामानि। विरुद्धस्म
रणंमन्यतेमन्युः। मनज्ञाने। शोचतिअनेनशोकः। शुकृ शुचशोके। शोकनामानि। प
श्चात्तपतिपश्चात्तापः। अनुतापश्च। तपसंतापे। विरुद्धप्रतिसरति[illegible]सारः। स्मृग
तौ। पश्चात्तापनामानि॥ ३५॥ कोपक्रोधामर्षरोषप्रतिघारुट् क्रुधौस्त्रियां॥ शुचौतुच
रितेशीलमुन्मादश्चित्तविभ्रमः॥ ३६॥ कुप्यतेनेनकोपः। कुपकोपे। क्रुध्यतिक्रोधः। क्रु
धकोपे। नमर्षस्यतेनेनअमर्षः। रुषसद्मनो रुष्यतेनेनरोषः। रुषहिंसायां। रुट् प्रतिहन्य
तेप्रतिघः। रुध्यतेअनया रुट्। रुधकोपे। शीलयतिनेनशीलंसमाधौ। शुचिचरितनाम।
उन्माद्यतेअनेनउन्मादः। मदीहर्षग्लपनयोः। भूताद्यावेशादागतविभ्रमनाम॥ ३६॥
ना: प्रेमाद्याःप्रियताहार्दंप्रेमस्नेहोथदोहदं। इच्छाकांक्षास्पृहेहातृड्वांछालिप्सामनो

तरोमांचो रोमहर्षणं ॥ ३४ ॥ आसमंतात् छुरति छुरिकां । छुर छेदने । अमर्षहासनामा स्मी
यते स्मितं । षीङ् ईषद्धसने । ईषद्धासनाम । विहस्यते विहसनं । मध्यमहासनाम । रोमाणि
अंचति रोमांचः । अंचु गतिपूजनयोः । हृष्यते रोमाण्यनेन रोमहर्षणं । हृष तुष्टौ । हृष अलि
केवा धातुः । पुलकोद्गमनामनी ॥ ३४ ॥ क्रंदितं रुदितं क्रुष्टं जृंभस्तु त्रिषु जृंभणं ॥ विप्रलं
भो विसंवादो रिंगणं स्खलनं समे ॥ ३५ ॥ क्रंदति अनेन क्रंदितं । क्रदि आह्वाने रोदने
च । रोदिति अनेन रुदितं । रुदिर् अश्रुविमोचने । क्रोशति अनेन क्रुष्टं । क्रुश आह्वाने
रोदने च । रुदितनामानि । जृंभते जृंभः । जृंभणं च । जृभि जृंभी गात्रविनामे । निद्रावसाने आ
रंभे वा मुखविकारविशेषनामनी । स्खलति स्खलनी । स्खल संचलने । रिंखति रिंखणं । ५८
रिखि गतौ । रिंगमिति पाठे रिगि गतौ ॥ प्रतारणनामनी । चत्वार्यतानि विप्रस्तारस्यैवेतिको
चित् ॥ ३५ ॥ स्यान्निद्रा शयनं स्वापः स्वप्नः संवेश इत्यपि ॥ तंद्री प्रमीला भ्रुकुटी भ्रुकु

टिर्भ्रुकुटिः स्त्रियां ॥ ३६ ॥ नियतं द्राति यत्रेंद्रियाणि निद्रा । द्रा कुत्सायां गतौ । यत्र शेरते श
यनं । शीङ् स्वप्ने । स्वपति यत्र स्वापः । स्वप्नश्च । स्वपु स्वापे । संविशति अत्र संवेशः । विश
प्रवेशने । ततमिंद्रियाणां विस्तारं द्राति तंद्री । द्रा कुत्सायां गतौ । प्रमीलति नयनान्यत्र प्र
मीला ॥ मील निमीलने । मदाद्यमजनितेंद्रियोपरतिनामानि । भ्रुवोः कुटिः कुटिलता भ्रु
कुटी । भ्रुकुटिश्च । कुट कौटिल्ये । कुटिलताया नाम ॥ ३६ ॥ अदृष्टिः स्यादसौम्येक्षिणे संसि
द्धिप्रकृती त्विमे ॥ स्वरूपं च स्वभावश्च निसर्गश्चाथ वेपथुः ॥ ३७ ॥ असौम्या दृष्टिर्विरुद्ध
दर्शननाम । संसिध्यति संसिद्धिः । षिधु गत्यां । प्रकर्षेण क्रियते प्रकृतिः । स्वस्य रूपं स्वरू
पं । स्वमात्मानं भावयति स्वभावः । भुवो अवकल्कने । निसर्जते निसर्गः । सृज विसर्गे । स्व
भावनामानि । वेपते वेपथुः ॥ ३७ ॥ कंपोऽथ क्षण उद्धर्षो मह उद्धव उत्सवः । इति नाट्य
वर्गः ॥ टुवेपृ कंपने । कंपते कंपः । कपि चलने । कंपनामनी । अथ शुभं क्षिणोति दिनस्ति

क्षरणः। क्षरणु हिंसायां। उत्कृष्टः हर्षो उद्धर्षः। मह्यते जनैर्महः। मह पूजायां। उत् उद्धूतं दूयं
ते जनाः अत्र उद्धवः। उत् उद्धूतं जनान् सुवत्यत्र उत्सवः। सुव प्रेरणे। उत्सव नामानि॥ ३०
॥ इत्यमरकोशाप दविवरणे नाम नाट्यवर्गः॥ ७ ॥ अधोभुवनपातालबलिसद्मरसा
तलं। नागलोकोथ कुहरं सुषिरं विवरं बिलं॥ १॥ अधः स्थितं भुवनमधोभुवनं। पतत्यस्मि
न्निति पातालं। पत ल्टगतौ॥ बलेः सद्म बलिसद्म। रसायाः स्तलं रसातलं। नागानां लोकः
नागलोकः। नागलोकनामानि। प्राण्यादिकं कुत्सितं हरतीति कुहरं। हृञ् हरणे। तमसा
कुहतीति विस्मापयति वा कुहरं। कुह विस्मापने। सुष्ठु स्पति गति मिति सुषिरं। षोंत्त कर्म
णि॥ विव्रियते विवरं। वृञ् वरणे। बिल्यते बिलं॥ १॥ छिद्रं निर्व्यथनं रोकं रंध्रं स्वभ्रं वपा ६०
शुषिः॥ गर्तावटौ भुवि श्वभ्रे सरंध्रे सुषिरं त्रिषु॥ २॥ बिलभेदनो। छिद्यते छिद्रं। छिदिर
द्वैधीकरणे। निर्व्यथ्यते स्मिन्निति निर्व्यथनं। व्यथ भयचलनयोः। रौति स्वगतिं प्राणिमुखेन

रिति दावः। दु दानादयोः। द्रवयति हृदयमनेन द्रवः। द्रु गति हिंसा कौटिल्येषु। कलयति चि
त्ते केलिः। कल चलने। किलति वा केलिः क्रीडायां। केलि ईर्योः। परिहसनं परिहासः। हस
हसने। क्रीडतीति क्रीडा। क्रीड विहारे। खेलति खेला। खेल चलने। खुर्दति खुर्दनं। खुर्द क्रीडा
यां। विहार नामानि॥ ३२॥ व्याजोपदेशो लक्ष्यं च क्रीडा खेला च कूर्दनं॥ घर्मो निदाघः स्वेद
स्यात् प्रलयो नष्टचेष्टता॥ ३३॥ अवहित्थाकारगुप्तिः समौ संवेगसंभ्रमौ॥ अं गं जिघर्ति घर्मः।
घृ क्षरणदीप्त्योः। निदह्यते निदाघः। दह भस्मीकरणे। निदाघकाले जातो वा निदाघकालः
स्विद्यते स्वेदः। ञिष्विदा गात्रप्रक्षरणे। स्वेद नामानि। प्रलीयते प्रियां तेपि प्रलयः। लिङ् श्लेष
णे। नष्टचेष्टित नाम। अवहीयते गोप्यते आकारोत्र अवहित्था। ओहाक् त्यागे। आकारगु
प्ति नाम। संवीज्यते संवेगः। ओविजी भयचलनयोः। संभ्रमयेन संभ्रमः। भ्रमु अनवस्थाने। सं
भ्रम नामनी॥ ३४॥ स्यात् आच्छुरितं संहासः सोत्प्रासः स मनाक्स्मितं॥ मध्यमं स्यात् विहसि

तमसं। क्षीणध्वांतनाम। समंतात्तमः॥३॥ विष्वक्संतमसं नागाः काद्रवेयास्तदीश्वराः।
शेषोनंतो वासुकिस्तु सर्पराजोथ गोनसे॥४॥ संतमसं। विष्वक्सर्वतो व्याप्य स्थितं तमो नाम॥
नागेति नागाः। कद्र्वा अपत्यानि काद्रवेयाः। द्वे नामनी सर्पनामनी॥ शेते हरिरस्मिन्नि
ति शेषः। अंतकालेपि शिष्यत इति वा। अपूर्वोपयोगे। न विद्यते अंतो यस्य अनंतः। दिव्य
सर्पेश्वरनामनी॥ वसति पाताले वासुकिः। वस निवासे। वसुकस्यापत्यं वा। सर्पराजा सर्प
राजः। अदे वयोनि सर्पराजनामनि। गोरिव नासा यस्य गोनसः॥४॥ तिलित्सस्यादज
गरे शयुर्वाहस डुंडुभौ॥ अलगर्दो जलव्यालः समौ राजिल डुंडुभौ॥५॥ तिलति स्नेह
ति तिलित्सः। तिलस्नेहने। तिलंग इति पाठे। तिलगतौ। आंध्रभाषायां विलमा गिरति गि
रः। अजस्य गरः अजगरः। अजो नित्यो गरो विषमस्येति वा। शेते लक्ष्यमिति शयुः। शीङ् स्व
प्रावाहं गतिस्पतिवाहसः। स्पृहिंसायां। वहति प्राणिनः आत्मवशं प्रापयति वा। वहत्रा

षणे। ये तु लक्ष्म। अलं गिरते भेकानिति अलगर्दः। जले व्यालो जलव्यालः॥ राजिलाति रा
जिलः। ला दाने। डुंडुरिति डुंडुभः। डुंडु इति भाषते। निर्विषादि मुखसर्पनामनी॥५॥ मालु
धानो मातुलाहिर्निर्मुक्तो मुक्तकंचुकः॥ सर्पः पृदाकुर्भुजगो भुजंगोहिर्भुजंगमः॥६॥
मातुरोषभिधानं स्थानमस्य मालुधानः। मातुले धुनुरे अहिः। मातुलाहिः। निर्मुच्यते
अनेन निर्मुक्तः। मुचिल्र मोक्षणे। मुक्तकंचुकनामनी। सर्पति सर्पः। सृप्लृ गतौ। पर्दति
पृदाकुः। पर्द शब्दे। आसुप्रत्ययः। पृदाकुः। भुवं त्रियते व्यायच्छति वा। यम् व्यायामे। भुज
ति भुजगः। भुज कौटिल्ये। भुजः सर्पदेहः तेन गच्छति वा भुजगः। भुजंगमश्च। अद्धि अत्र
दि। अहिंगतौ॥६॥ आशीविषो विषधरश्चक्री व्यालः सरीसृपः॥ कुंडली गूढपाच
क्षुःश्रवाः काकोदरः फणी॥७॥ आशिषि दंष्ट्रायां विषमस्य आशीविषः। विषस्य ध
रो विषधरः। चक्रं मंडलाकारमस्यास्ति चक्री। दष्टुं दंडति व्यालः। अड उद्यमे। कुटि

लं सर्पतीति सरीसृपः। सर्पगतौ। कुंडलयोगात्कुंडली। गूढाः पादा यस्य गूढपात्॥ चक्षुषी
श्रवसी यस्य चक्षुःश्रवाः। काकस्येवोदरं यस्य काकोदरः। काको विषविशेषः। भ्रदरेय
स्येति वा। फणाः संत्यस्य फणी॥ ७॥ दर्वीकरो दीर्घपृष्ठो दंदशूको बिलेशयः॥ उ
रगः पन्नगो भोगी जिह्मगः पवनाशनः॥ ८॥ दर्वी फणया करणाति दर्वीकरः। ऋ हिं
साया। दर्वी फणस्येवाकारो यस्येति वा। दीर्घं पृष्ठमस्य दीर्घपृष्ठः। कुत्सितं दशतीति दं
दशूकः। दंश दशने। बिले शेते बिलेशयः। उरसा गच्छतीत्युरगः। पन्नं न गच्छतीति पन्न
गः। भोगो स्यास्तीति भोगी। जिह्मं कुटिलं गच्छतीति जिह्मगः। पवनः अशनं यस्य पवनाश
नः। सर्पनामानि॥ त्रिष्वाहेयं विषास्थ्यादि स्फटायां तु फणा द्वयोः॥ समौ कंचुकनि ६२
र्मोकौ क्ष्वेडस्तु गरलं विषं॥ ९॥ अहौ सर्पे भवति आहेयं। विषास्थ्यादिनामा। स्फुटति
अनया आदृति घृतिः स्फुटा। स्फुर फाटस्फटिक विदारणे। फनति अनया फणा। फण

शब्दायते रोगं॥ स्त्रुद्धीसेो। गातिरं ध्रयतिरंध्रं॥ रंध्र हिंसा संराध्योः। रणति वा रंध्रं। रण शब्दे।
शुभं परिहृत्य अभ्रतिवततेश्वभ्रं। उप्यते क्षिप्यते धान्यादिकमस्यां वपा। डुवप बीजसंताने।
श्रमातपतनात् सुषु सुष्यति सुषिः। षोंतकर्मणि। बिलनामानि॥ गिरति पर्वादिना गर्त्तः। गृ निग
रणे। आवति अस्माच्च मयूरादिकमित्यवटः। अव्यते अत्रपातादिवति वा अवटः। अवर
क्षणे। गर्त्तनामानी॥ सुषिः। अस्यामिति सुषिरं। सुर ऐश्वर्ये ण्यादिनामा॥ २॥ अंधकारोस्त्रि
यां ध्वांतं तिमिस्रं तिमिरं तमः॥ ध्वांते गाढेंधतमसं क्षीणेवतमसं तमः॥ ३॥ अंधवत्करो
त्यंधकारः। ध्वनंति अत्र पथ्यो न पश्यंतो ध्वांतं। ताम्यतीति तिमिरं। तमश्चा तमु ग्लानौ। ति
म्यति अनुष्ठस्त्वादिति वा तिमिरं॥ तिम आर्द्रभावे। तम एव तमिस्रं। तमिस्रं स्त्रीनपुंसकयोः।
अंधकारनामानि॥ अंधं तमं अंधतमसं। अंधयति जनानां दृष्टिमिति वा अंधतमसं। अघु
दृष्ट्युपसंहारे। गाढध्वांतनामानि। नागंतिनागाः। क्का ह्मा। अपत्या। विक्का अवक्षीणं तमः अव

स्तिजांगलिकः। विषवैद्यनामा। आदितुंडेन जीवति आहितुंडिकः॥११॥ व्यालग्राहिपुरु
षनाम॥ ॥इत्यमरकोषपदव्याख्याने पातालो भोगिवर्गः॥ ॥स्यान्नारकस्तु नरको
निरयो दुर्गतिस्त्रियां॥ तद्भेदास्तपनावीचिमहारौरवरौरवाः॥१॥ नारं नरसमूहं अ
स्मिन्नकायतीति नारकः। नरकम्बाके शब्दे निर्गतः। अयो देवमस्मिन्निति निरयः। दुष्टा
गतिः दुर्गतिः। नरकनामानि॥ तप्यंते पापिनो अत्र तपनः। तप संतापे। अव्यंते रक्ष्यंतेस्माद
वीचिः। अव रक्षणे। अवीचिः स्त्रीनपुंसकयोः। रुरवो अत्र संतिरौरवः॥२॥ संघातः का तारः
लसूत्रं चेत्याद्याः सत्त्वास्तु नारकाः॥ कुंभीपाक प्रेता वैतरणी सिंधुः स्यादलक्ष्मीस्तु
निर्ऋतिः॥३॥ संहन्यंतेस्मिन्निति संहारः। संघात इति पाठे हन हिंसागत्योः। काला
न्ययोमयानि सूत्राण्यस्मिन्निति कालसूत्रः। इत्यादि नरकभेदनामानि। प्रकर्षेण न ६३
रकमिताः प्रेताः। नरकसंबंधिप्राणिनाम। विगतं तरणं विस्तरणं अत्र वितरणं। वित

रणेनैव नरलोके भवा वैतरणी। विस्तारणेर्वा वैतरणी नाम। नरकसिंधुनाम। न लक्ष्यते
अलक्ष्मीः। लक्ष दर्शनांकनयोः। ऋतात् सन्मार्गात् निष्क्रांता निर्ऋतिः॥४॥ विष्टिराजूः कारणा तु
यातना तीव्रवेदना॥ पीडा बाधा व्यथा दुःखं आमनस्यं प्रसूतिजं॥३॥ अभाग्यनामनी॥
विशंति यया नरकं विष्टिः। विष प्रवेशने। आजवते नरकं यया आजूः। जु अ गतौ। नरकेदं
दासनामानि। करणं ति कारणा। कृ हिंसायां। यातिना अंयया यातना। या प्रापणे। तीव्रवेदना
नामनी। कषिष्यति हिंसिष्यति कष्टः। कष हिंसायां। कृणाति वेष्टयति कृच्छ्रं। कृती वेष्टने। आ
समंतात् छिमं लाति आभीलं॥५॥ स्यात्कष्टं कृच्छ्रमाभीलं त्रिष्वेषां भेद्यगामियत्॥ ॥ला
शानोशरीरपीडा नामानि दुःखवाचकानीति केचित्॥ ॥इत्यमरकोशप्रकरणे पदवि
वृतौ नरकवर्गः॥ ॥समुद्रोब्धिरकूपारः पारावारः सरित्पतिः॥ उदन्वानुदधिः सिंधुः सरस्वा
न्सागरोर्णवः॥१॥ समुनति समुंद्रः। उंदी क्लेदने। समंतान्मुदं राति वा। आपो धीयंतेस्मिन् त्रे

ब्धिः॥ मर्यादया कुं भुवं न पृणाति न कूपारः। पालनपारणपूरणयोः॥ अवारपारमस्य दुस्त
रत्वात्पारावारः॥ सरितां पतिः सरित्पतिः॥ उदकमत्रास्तीत्युदन्वान्॥ उदकानि धीयंतेत्रेत्युद
धीः॥ स्यंदते जलमत्र सिंधुः॥ स्यंदू प्रस्रवणे॥ सरोस्यास्तीति सरस्वान्॥ सगरैः कृतः सागरः
अर्णांस्यत्र संतीत्यर्णवः॥ २॥ रत्नाकरो जलनिधिर्यादपतिरसांपतिः॥ तस्य प्रभेदाः क्षी
रोदो लवणोदस्तथापरे॥ ३॥ रत्नानामाकरो रत्नाकरः॥ जलानां निधिः जलनिधिः॥ या
दसांपतिः यादःपतिः॥ अपांपतिः॥ अप्पतिः॥ समुद्रनामानि॥ क्षीरमुदकं यस्य क्षीरोदः॥ ल
वणमुदकं यस्य लवणोदः॥ तथापरे॥ कृतोदः दध्युदः घृतोदः सुरोदः इक्षुदः स्वादूदः॥ २॥
आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलं॥ पयः कीलालममृतं जीवनं भुवनं वनं॥ ३॥ ६४
इंद्रेण आप्यंते आपः॥ आप्लृ व्याप्तौ॥ वृणोति वा वारि॥ [illegible] वरणे॥ सरति सलिलं॥ स्व
गतौ॥ काम्यते ऋषिभिः रसितिकमलं॥ जलति [illegible] जडीभवति जलं॥ [illegible] पीयते पयः॥ की

गतौ॥ दर्वी नामा॥ कंचुकवत्तिष्ठति कंचुकः॥ निर्मुच्यते निर्मोकः॥ सर्पकंचुकनाम्नी॥ क्ष्वेडय
ति क्ष्वेडः॥ ञिक्ष्विदा अव्यक्ते शब्दे॥ अत्तारं गिरति गरलं॥ दद्ह वेवेष्टि विषं॥ विषॢ व्याप्तौ॥
विषशब्दः पुंसि क्लीबे च॥ विषनामानि॥ ९॥ पुंसि क्लीबे च काकोलकालकूटहलाह
लाः॥ सौराष्ट्रिकः शौक्लिकेयो ब्रह्मपुत्रः प्रदीपनः॥ १०॥ काकवन्मेचकः काकोलः॥ का
कवत्कोलयति संस्त्यापयति वा काकोलः॥ कालवर्णस्य कूटः कालकूटः॥ हलति जठरं
हलाहलः॥ हल विलेखने॥ सुराष्ट्रदेशभवः सौराष्ट्रिकः॥ शुक्लदेशभवः शौक्लिकेयः॥ ब्र
ह्मणः पुत्रो ब्रह्मपुत्रः॥ प्रदीपयति प्रदीपकः॥ दीपि दीप्तौ॥ १०॥ दारदो वत्सनाभश्च वि
षभेदा अमी नव॥ विषवैद्यो जांगुलिको व्यालग्राह्याहितुंडिकः॥ ११॥ इति पाताल
भोगिवर्गः॥ ॥ दारयति दारदः॥ दारम्नामविशेषभवो वा॥ वत्सस्येव नाभिर्यस्य वत्स
नाभिः॥ अमी नव विषभेदानामा॥ जांगलीविषविद्या॥ जांगलिर्वा॥ जांगलावासास्या॥

बिभेति सर्पान् भेकः। डिंभि डामयो मंडते शोभते किंकिणीजालवत्ताकारो मंडूकः॥ मडि
भूषायां वर्षासु भवति वर्षाभूः। भू सत्तायां। शालति प्लवते शालूरः। शब्दैः दूरणं दुरण
ति दर्दुरः। भेक नामानि। २४॥ शिली गंडूपदी भेकी वर्षाभ्वी कमठी डुलिः॥ स्थूलस्यापि
यास्त्रं गी डुलिर्नामा दीर्घकोशिका॥ २४॥ शिनोति श्यति वा शिली। श्योतन्त्कारणे मी
लति मदति ति। शील उछे। गडूपद जाति स्त्री नाम। भेकी वर्णा स्त्री। भेक जाति स्त्री ना
मा जलं डोलयति डुलिः। डुल उत्क्षेपे लोक मठ जाति स्त्री नाम। ग्लगाति ग्लगी। ग्लह हिंसा
यां। मद्गुरः। अस्य भार्या नामा दुष्टो नाम न मनमस्यास्ति दुर्नामा। आकारांतः दीर्घ
कोशाकारत्वाद्दीर्घकोशिका॥ हस्ति जलौक नामनी॥ २४॥ जलाशया जलाधाराः त
त्रागाधजलोह्रदः [illegible] आहावस्तु निपानं स्यादुपकूपजलाशये॥ २५॥ जलमा
शेते जलाशयः। जलस्य आधारो जलाधारः। साधारण जलस्थान नामनी। कल्लो ६०

ने पाठीनः। पाठ व्यक्तायां वाचि। पाठ्यते स्वजातीयैः विरुद्धमिति वा। पट भेदने। वंकुर
द्धस्य नामनी। उलुपति मित्युलूपी। लुप लोपे। शिशुर्भवति शिशुकः। शिशुवच्चपल
मत्स्य नामनी। न उर्ध्वे त्वरणे चीयते लीयते चिलिचिमिः। चीङ् चयने। लीङ् श्लेषणे।
त्वरणसंचारि मत्स्य नामनी। ओषति पित्तादि प्रोष्ठी। उष प्लुष दाहे। शफानु गति साध
नावयवान् शरीरेण ति पीडयति शफरी। री गति रेषणयोः। पित्तमीन नामनी॥ २०॥
क्षुद्रांडो मत्स्यसंघातः पोताधानमथो रुक्या॥ रोहितो मद्गुरः शालो राजीवः शकु
लस्तिमिः॥ २६॥ क्षुद्राणामपरिमितपरिणामानामण्डं। क्षुद्राण्डः। मत्स्यानां सं
घातो मत्स्यसंघातः। मत्स्यपोताः अस्मिन्नाधीयंते पोताधानं। मत्स्यपोतसमूह नाम
लोहितवर्णत्वाद्रोहितः। जलमज्जति मद्गुरः। मज्ज निमज्जने। शलति शालः। शल
आशुगमने। राज्यः अस्य संति राजीवः। शक्नोति गंतुं शकुलः। शकुल शकौ॥ तिम्य

तिमिः। तिमश्चाद्रभावे। इर्ण्॥ तिमिंगिलादयश्चाथ यादांसि जलजंतवः॥ तद्भेदाः शि
शुमारोद्रशंखवो मकरादयः॥२०॥ तिमिंगिलश्चेति तिमिंगिलः। गृ निगरणे। एव
मादीनि झषविशेषनामानि॥ यातयंति बाधं स्यात् यादांसि। यदैतु प्रयत्ने कुर्वंति यादांसि यदी
प्रयत्ने। क्रूरजलजंतुनामानि॥ शिशून् मारयतीति शिशुमारः। मृङ् प्राणत्यागे। उनत्ति उन्द
उदी क्लेदने। शंकते स्मात् शंकुः॥ शंकि शंकायां॥ मयां करोति मकरः। एवमादीनि यादो
भेदनामानि॥२०॥ स्यात्कुलीरः कर्कटकः कूर्मे कमठकच्छपौ॥ ग्राहो
ऽवहारो नक्रस्तु कुंभीरोऽथ महीलता॥ गंडूपदः किंचुलिको निहाका गोधिका समे॥
२१॥ कौ लीयते कुलीरः लीङ् श्लेषणे॥ कुलीः मातृपरलोकाय ईरयति वा ईर प्रेरणे।
कृणेति जननीं कर्कटकः॥ कृत् हिंसायां॥ कर्कटनामानि॥ मह्यां लतेव तिष्ठति महील
ता॥ गंडुः शरीरग्रंथय एव पदानि यस्य सः गंडूपदः॥ कृमि॥ किंचित् चुलति

अपनयति किंचित्लुपः। चुल अपनये। लताकारपाठ्ल वर्णे कृमिनामानि॥ एति ज
हाति बिलान् निहाका॥ ओहाक् त्यागे॥ गुध्यति गोधिका॥ गुध परिवेष्टने॥ जलचरप्राणिवि
शेषनामानि॥२१॥ रक्तपा तु जलौकायां स्त्रियां भूम्नि जलौकसः॥ मुक्तास्फोटः स्त्रियां
शुक्तिः शंखः स्यात् कंबुरस्त्रियां॥२२॥ रक्तं पिबति रक्तपा। रक्तपावा॥ जलमोकः स्था
नं यस्याः जलौका॥ जलौकसश्च॥ जलूकनामानि॥ मुक्ताः स्फोटंतीयतः मुक्तास्फोटः
स्फुट विकसने॥ मुक्ताः यतः शोकं तीति शुक्तिः॥ शं सुखं खनति शंखः। खनु अवदारणे॥ ज
न नार्थं च दुःखं शमयति वा। शमु उपशमने। मंगलार्थिना काम्यते कंबुः। कमु कांतौ॥
शंखनामानि॥२२॥ क्षुद्रशंखाः शंखनखाः शंबूका जलशुक्तयः॥ भेके मंडूकवर्षा
भूः शालूरप्लवदर्दुराः॥२३॥ शंखवदने विघते खमाका शोस्य प शंखनखा न घा
दौ क्षुद्रशंखनामानि॥ शं सुखं वाति शंबूकः॥ वा गति गंधनयोः॥ जलशुक्तिनाम॥

स्यति बडिशं॥ श्यो तन्करणे। मत्स्या विध्यंते येन मत्स्यवेधनं॥ व्यधताडने। मत्स्यगल
नाद्समीपकायोयंत्रनाममनी॥१६॥ पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः॥ विसा
रः शकुली चाथ गडकः शकुलार्भकः॥१७॥ पृथूनि रोमाणि पक्ष्माणि यस्य पृथु
रोमा॥ बालमत्स्यान् झषति झषः। झषदिंसायां॥ माद्यति मांसजिघ्रक्षया मत्स्यः। म
दी हर्षग्लपनयोः। मीयते धीवरेण मीनः। मीङ् हिंसायां॥ मिनोति क्षिपति जलमिति वा
डुमिञ् प्रक्षेपणे॥ विसारतीति विसारी। स्वगतो। विसारिएव वैसारिणः। अंडाज्जायते अं
डजः। विसरति विसारः। शकलं दास्यमस्यास्ति शकली। शकुल इति वा पाठः। शक्यते ग
हीतु शकुलः। शकुस्त्वराक्तौ॥ मत्स्यप्रभेदनामानि॥ गडति पुछाछोदनाद्गडकः॥ शकु
लार्भक नाम॥१७॥ सहस्रदंष्ट्रः पाठीन उलूपी शिशुकः समौ॥ नलमीनश्चिलि
चिमः प्रोष्ठी तु शफरी द्वयोः॥१८॥ बहुदंष्ट्रत्वा सहस्रदंष्ट्रः। भक्ष्यतया शास्त्रेषु पठ्य ६८

मरित्रं धारयतिकर्णधारः। नावा तारयति नाविकः। नौतारयितृनाममनी॥११॥ सांया
त्रिकः पोतवणिक् कर्णधारस्तु नाविकः॥ नियामकाः पोतवाहाः कूपको गुणवृ
क्षकः॥ नौकादंडः क्षेपणी स्याद्दरित्रं केनिपातकः॥१२॥ नेतुं नियच्छंति नियामकाः
यम उपरमे। पोतवहनामा। कूपप्रकृतिस्थलात्कूपकः। गुणेन रज्वा बद्धो वृक्षकः गुणवृ
क्षकः। पोतमध्यस्थपताकास्तंभनाममनी॥ क्षिप्यते यया नौः क्षेपणी। क्षिप प्रेरणे।
नौप्रेरणदंडनाम। ऋच्छति नौ अनेन अरित्रं। ऋगतौ। केजले नावा निपात्यंते नेन
केनिपातनं। पतुल्लगतौ। नौदर्वीनाममनि॥१२॥ अभ्रिस्त्री काष्ठकुद्दालः सेकपा
त्रं तु सेचनं॥ पानपात्रं तु पोतोब्धिभवे त्रिषु समुद्रियं॥१३॥ अभ्रयति पोते लवणं
पातयति अभ्रिः। अभ्रगतौ। लवणादिखनन काष्ठकुद्दालनाम॥ सेकायपात्रं
सेकपात्रं। सिच्यते नेन सेचनं। षिचिर क्षरणे। पोतरंध्रप्रविष्टस्यजलस्य बहिः सेचनं।

पनिर्मितदारुपात्रनामनी॥ यानाय पात्रं यानपात्रं। प्लवते कालान्तरमेण पोतः। प्लवविदा
रणे। वादित्रनामनी॥ समुद्रे भव समुद्रियं। त्रिषु कथ्यं। समुद्रिया आपः समुद्रियं लव
णं। समुद्रियस्तरंगः। इत्यादि॥ १३॥ सांमुद्रिको मनुष्यो ब्धिजातादौ नो समुद्रिका॥
क्लीबेर्धनावं नावोर्धे तितनोकेतिति स्त्रिषु॥ त्रिष्वागाधाप्रसन्नोच्छः कलुषोनच्छ आ
विलः॥ १४॥ अब्धिभवमुक्तादिनाम॥ नावः अर्धं अर्धनावं। नावार्धनाम। नावमति
क्रांतं अतितनु। अतीतनौकजलादिनाम। वक्ष्यमाण अगाधशब्दपर्यंतं त्रिषु वर्त्तते।
प्रसीदति प्रसन्नः। षदुलविदारणे। अवसादनेषु॥ न छाद्यते अच्छः। छदु अपवा
रणे। निर्मलनामनी॥ कं जलं लुनाति कलुषः। लुञ् छेदने। न अच्छः अनच्छः। आ ६०
विलति आविलः। बिलभेदने। अनिर्मलनामानि॥ १४॥ निम्नं गभीरं गंभीरमुत्ता
नं तद्विपर्यये॥ अगाधमतलस्पर्शे कैवर्त्ते दाशधीवरौ॥ १५॥ खननाय नितरां म्ना

यते निम्नं। म्ना अभ्यासे। गमने भियं राति गभीरं। गंभीरं च। रा दाने। गां भुवं भियमीरयति वा
ईरप्रेरणे अ स्वर्था निम्ननामानि। ऊर्ध्वं तन्यते उत्तानं। तनु विपर्यये। निम्नविपर्ययनाम।
न गाधमगाधं। गाधृ प्रतिष्ठालिप्सयोः। न विद्यते तलस्पर्शोत्र अतस्पर्शं। अतलस्पर्श
नामानि॥ के जले वर्त्तते कैवर्त्तः। वृतु वर्त्तने। मत्स्यादयः। तेषां दंतायं कैवर्त्तः। विक्रये
णे मत्स्यान्ददाति दाशः। दासृ दाने। दास्यति मत्स्यानिति वा। दासृ हिंसायां। मत्स्यं ध
त्ते धीवरः। मत्स्यान् ध्यायति वा। ध्यै चिंतायां। जालिकनामानि। आनायः पुंसि जालं
स्यात् शणसूत्रं पवित्रकं। मत्स्याधानी कुवेणी स्याद्बडिशं मत्स्यवेधनं॥ १६॥ मत्स्याः
अनेन नीयंते आनायः। णीञ् प्रापणे। जालवद्गवाक्षवत्तिष्ठति जालं। जालनामनी॥
मत्स्यत्वेन नलं पुनाति पवित्रकं॥ यद्वा पवनो शणमयं शणसूत्रं। जालरज्जुः मत्स्याः
धीयंते अत्र मत्स्याधानी। कुत्सितं वेणं ते मत्स्या अत्र कुवेणी। वेणृ गतौ॥ बालिनो मत्स्यान्

पुष्करमुदकमत्रास्तिपुष्करिणी। खन्यतेखातं। खनु अवदारणे। कृत्रिमजलाशयनाम
नी। नखन्यतेअखातं। देवैःखन्यतेदेवखातं। तटानिअकतिकुटिलंयथाभवतितथाप्रा
प्नोतितडागः। अककअगकुटिलायांगतौ। प्रवाहेणतटानिताडयतितडागः। तडतडआ
घाते। पद्माकरनामानि। कुमुदकमासरस्यत्रकासारः। कमलानांयुक्तःकासारः। इय
र्तिवासरतिप्रवहतिवासरसी। सरस्वासांतोयांस्त्वगतौ। २७। वेशंतःपल्वलंचाल्पस
रोवापीतुदीर्घिका। खेयंतुपरिखाधारस्त्वम्भसांयत्रधारणं॥ २८॥ नअल्पवर्तिम
द्रजलाशयाशयमह्दिपादयः। अस्मिन्विशंतः। वेशंतः। विशप्रवेशने। पल्वंतिमहि
षादयोअत्रपल्वलं। पल्लगतौ। अल्पसरोनाम। उप्यतेपद्मादिकमस्यांवापी। डुव
पूबीजसंताने। दीर्घैवदीर्घिका। दीर्घचतुरस्रयाजातजलस्यनामनी। खन्यतुपरि ७९
खा। [illegible] लमावालमावापोथनदीसरित्॥ २९॥

खन्यतेपरिखा। खेयंचा। दुर्गवेष्टनखातिकनामानी। आध्रियतेआपोचआधारः। अंभो
धारणगर्तनामा। आलूयतेआलवालं। लुङ् छेदने। अंभःआवलतेअत्रआवालं। व
लसंवलने। आसमंतादुप्यतेअत्रआवापः। सेकार्थपरितःपरितःकृतजलाधारनामानी।
नदतिजलवेगेननदी। नदअव्यक्तेशब्दे। सरतिसरत्। सृगतौ। तरंगाःअस्यासंतितरं
गिणी। शैवलमत्रास्तिशैवलिनी। तटावस्यास्तितटिनी। ह्रादोस्यास्तिह्रादिनी। ह्र
दुनिवापाठः। धुनोतिपापंधुनी। धुञ् कंपने। २९। तरंगिणीशैवलिनीतटिनीह्रद
नीधुनी॥ स्रोतस्वतीद्वीपवतीस्रवंतीनिम्नगापगा॥ भागीरथीत्रिपथगात्रिस्रोताभी
ष्मसूरपि॥ ३०॥ स्रोतःअस्यास्तिस्रोतस्विनी। द्वीपान्यस्यांसंतिद्वीपवती। स्रवतिस्र
स्रवंति। निम्नंगच्छतिनिम्नगा। भगीरथस्यापत्यंभागीरथी। चयाणांपथानांसमाहा
रःत्रिपथं। तेनगच्छतित्रिपथगा। त्रीणिस्रोतांसियस्यांसात्रिस्रोता। भीष्मस्ततेभी
ष्मसूः। षुङ् प्राणिप्रसवे। भागीरथीनामानि। ३०। कालंदीसूर्यतनयायमुनाश

मनस्वसा॥ रेवा तु नर्मदा सोमोद्भवा मेखलकन्यका॥ ३१॥ कलिंदपर्वतोद्भवा का।लिंदी।
सूर्यस्य तनया सूर्यतनया। यमेन यमलजा यमुना॥ शमनस्य यमस्य स्वसा शमनस्वसा।
यमुनानामानि॥ रेवति विंध्याद्रौ रेवा। रेवत्प्लवगतौ॥ नर्म केलिं पल्लवसे ददाति नर्मदा॥
सोमः उद्भवो यस्याः सा सोमोद्भवा॥ मेखलस्याद्रेः कन्यका मेखलकन्यका॥ नर्मदाना
मानि॥ ३२॥ करतोया सदानीरा बाहुदा सैतवाहिनी॥ शतद्रुस्तु शतद्रुः स्याद्वि
पाशा तु विपाट् स्त्रियां॥ ३३॥ ईश्वरकरतोयाज्जाता करतोया॥ सदा नीरमस्या अस्ति
सदानीरा॥ गौ। रा शब्दे। शर्वकरजलाज्जाता नदीनामनी॥ बाहुबलं ददाति बा
हुदा॥ सितमंबु वाहयति सितवाहिनी॥ सैव सैतवाहिनी॥ कार्त्तवीर्यवितारितनदी
नामनी॥ सुशोभनं यथा भवति तथा पापं तुदति शुतुद्रिः॥ तुद व्यथने॥ वशिष्ठम ७२
तिभयात् शतधा द्रवति शतद्रुः॥ द्रु गतौ॥ पुत्रशोकाकुलवशिष्ठः प्रविष्टः नदीनामनी॥

ौर व्यक्ते [illegible] ते हृद [illegible] ह्रद [illegible] [illegible] जलाशयनामा [illegible] आहूयते गावः
अस्मिन्नित्याहावः। द्वे निपानाहवयोः॥ नियतं पदा वो जनं पिबंति निपानं॥ कूपसमी
पे बद्धशिलामयतरु द्रोणी नामनी॥ २५॥ पुंस्येवांधुः प्रहिः कूप उदपानं तु पुंसि
वा॥ नेमिस्त्रिकास्य वीनाहो मुखबंधनमस्य यत्॥ २६॥ जलानि अन्नेन अनंति
अंधुः॥ अन प्राणने॥ जलं प्रजहाति प्रहिः॥ ओहाक् त्यागे॥ कुत्सिताः आपो अत्र ति
ष्ठंति कूपः॥ उदकानि पीयंते अत्र उदपानं॥ कूपनामानि॥ जलोत्तटनी यते जलोत्तकमने
ननेमिः॥ णीञ् प्रापणे॥ त्रयाणां रूपाणां समाहारः त्रिका॥ अगाधकूपाज्जलाक
र्षणार्थं कूपोपरि निर्मितैः त्रिचारयंत्रनामनी॥ ईष्टिकाभिः पिनह्यते वीनाहः॥ नह बंधने॥ वि
नाह इति वा पाठः॥ तदा सरव धातुः॥ कूपमुखबंधननामानी॥ २६॥ पुष्करिण्यां तु खा
तं स्यादखातं देवखातकं॥ पद्माकरस्तडागोऽस्त्री कासारः सरसी सरः॥ २७॥

अभः अनया प्रणल्यते प्रणाली। प्रणालइति वा पाठः। नल गतौ। प्रासादादौ नि
र्मितजलमार्गनाम। उत्तरे पदे त्रिषु वर्त्तते॥३४॥ देविका यां सरय्वां च भवे दावि
कसारवौ॥ सौगंधिकं तु कल्हारं हल्लकं रक्तसंध्यकं॥३५॥ दिविकायां भवं देविकं
सरय्वामुद्भवे सरयूद्भवं। दिविकासरयूद्भववस्तुनः क्रमेण नामनी॥ सुगंधः प्रयो
जनमस्य सौगंधिकं। के जले ह्लादते कल्हारं। ल्हद आल्हादने। इश शुक्लपरिम
लवदुत्पलनामनी। हल्लति भ्रमरोत्र हल्लकं। हल्ल भ्रमणे। संध्यावद्रक्तं
ध्यत्वाद्रक्तसंध्यकं। रक्तोत्पलनामनी॥३५॥ स्यादुत्पलं कुवलयमथ नीलां
जन्म च॥ इंदीवरं च नीलेस्मिन्नसिते कुमुदकैरवे॥३६॥ उत् ऊर्ध्वं पलति उत्प
लं। पल गतौ। कौ भुवि वलते कुवलयं। वल संचलने। कुत्सितो वलयो स्येवेति ७२
उत्पलमात्रनामनी। पुष्पेषु इंदति इंदीवरं। इदि परमैश्वर्ये। नीलांबुजमिति

स्पष्टं। नीलोत्पलनामनी॥ कौ मोदते कुमुदं। मुद हर्षे। के जले रवो स्य कैरवं। रव
स्य इदं कैरवं। सितोत्पलनामनी॥३६॥ शालूकमेषां कंदः स्याद्वारिपर्णी तु कुं
भिका॥ जलनीली तु शैवालं शैवलोथ कुमुद्वती॥३७॥ शालते शालूकं। शा
ल श्लाघायां। उत्पलादिकंदनाम। वारि पिपर्त्ति आच्छादयति वारिपर्णी। दृप पा
लनपूरणयोः। कुंभयति वारि कुंभिका। कुभि आच्छादने। वारिपर्णी तु कुंभिका इ
ति वा पाठः। जलोपर्यस्तलतारूपशस्तसरोजनामनी। जले नीलिका जलनीली।
जले शेते शैवालं। शैवलं च। शीङ् स्वप्ने। शैवालनामनी॥ कुमुदानि अस्यां
संति कुमुद्वती॥३७॥ कुमुदिन्यां नलिन्यां तु बिसनी पद्मिनी मुखाः॥ वा पुंसि प
द्मं नलिनमरविंदं महोत्पलं॥३८॥ कुमुदिनी च। कुमुद्वद्दीर्घिकानामनी।
नलिनी। पद्मिनी। बिसिनी। एवमादीनि कुमुदिनीवत्। पद्यते सेव्यते पद्मं।

पदुःखसेवायां॥ नल्यते रविद्युते चंद्रेण नलिनं॥ नल गंधने॥ गंधनं खेदः॥ अराचावि
दति अरविंदं॥ विंद लाभे॥ महच्च तत् उत्पलं च महोत्पलं॥ ३७॥ सहस्रपत्रं कमलं
शतपत्रं कुशेशयं॥ पंकेरुहं तामरसं सारसं सरसीरुहं॥ ३८॥ सहस्रपत्रा
णि यस्य सहस्रपत्रं॥ केन वारिणा मल्यते कमलं॥ मल मल्ल धारणे॥ शतपत्राणि
यस्य शतपत्रं॥ कुशे जले शेते कुशेशयं॥ पंके रुहति पंकेरुहं॥ रुह बीजजन्मनि प्रादु
र्भावे॥ ताम्यति रसाति च तामरसं॥ रस आस्वादने॥ रसस्याभवं सारसं॥ सरसीरु
रुहं॥ ३९॥ बिसप्रसूनराजीवपुष्कराम्भोरुहाणि च॥ पुंडरीकं सिताम्भोजमथ
रक्तसरोरुहे॥ ४०॥ बिसं प्रसूनमस्य बिसप्रसूनं॥ राज्यः अस्य संति राजीवं॥ पुष्णा ७५
ति पुष्करं॥ पुष पुष्टौ॥ अंभसि रोहति अंभोरुहं॥ पद्मनामानि॥ पुणति पुंडरीकं॥
पुण शुभकर्मणि॥ सितपद्मनाम॥ ४१॥ रक्तोत्पले कोकनदं नालो नालमथास्त्रि

विगताः पाशा यत्र सा विपाशा॥ विपाड् विपाशा नदीनामनी॥ ३३॥ शोणो हिरण्य
बाहुः स्यात्कुल्याल्पा कृत्रिमा सरित्॥ शरावती वेत्रवती चंद्रभागा सरस्वती॥ ३४॥
शोणति शोणः॥ शोण वर्णगत्योः॥ हिरण्यं वहति हिरण्यवाहः॥ वह प्रापणे॥ शोणन
दनामानि॥ कुल्यते कुल्या॥ कुल संस्त्याने॥ नदीमात्रकक्षेत्रसेकाय अल्पा कृत्रिमस
रिन्नाम॥ शरविशेषा अत्र संति शरावती॥ वेत्रा वेणवो अत्र संति वेत्रवती॥ चंद्रेण भा
गतोन्यस्ता चंद्रभागा॥ चंद्रभागाभ्यां गिरिभ्यां जाता वा॥ सरांसि अत्र संति सरस्व
ती॥ सरति प्रवहति वा सरस्वती॥ ३५॥ कावेरी सरितोन्याश्च संभेदः सिंधुसंगमः॥
द्वयोः प्रणाली पयसो पदव्यां त्रिषु तूत्तरे॥ ३६॥ कावेरादद्रेर्जाता वा कावेरी॥ एता
नि प्रत्येकं नदीविशेषनामानि॥ अन्याश्च रुचिवेणापादयः अनंता ग्रंथकारेण ग्रंथवि
स्तरभयान्नोक्ताः॥ संभिद्यते संगच्छंते अत्र सरितो सः संभेदः॥ अनेकसिंधुसंगमनाम

स्त्रियां॥मृणालंबिसम अब्जादिकदंबेखंडमस्त्रियां॥४२॥कोकान्ब्जवताकानंदं
यत्रकोकनदं।नदम्प्पलेशद्वे।रक्तपद्मस्परक्तोत्पलस्पचनामा।मृणलतेनालं।ना
लेचा।नलंगंधने।पद्मादिदंडाकारदंतनाम।मृणपतेमृणालं।मृणंतर्पणे।
मृणंहिंसायांमितिधातुर्वा॥भक्षणसमर्यंतंतवः।अत्रबिस्पंतेबिसं।बिस
उत्सर्गे।पद्मकंदोपरिस्थितभस्पनामी॥भ्रमरेभ्योरसंखनोतिखंडं।खण्ड
दाने।अनादिसमूहनाम॥४२॥करहाटः।शिफाकंदं किंजल्कः।केसरोस्त्रि
यां॥संवर्त्तिकानवदलंबीजकोशोवराटकः॥इतिवारिवर्गः॥ ॥४३॥ ॥
करंघ्नंतिकरहा॥मीनास्तेरघतेकरहाटः।अटपटगतौ।उपरिवर्धनादलं
रहयंतिकरहाः।पद्मादयः।रहत्यागे।तानिप्रतिदिनाभिवर्धयातेवार
रहाटः।शिनोतिभुवंशिफा॥शीङ्निशातने।कंदतिभक्षणार्थमत्स्यादीनि

तिकंदः। कंदि स्त्री आह्वाने। पद्मादिमूल नामानि॥ किंचिज्जलति जडो भवति किंज
ल्कः। जडघातौ। के जले सरति केसरः। स्वगतौ। केसर नामानि॥ संवर्त्तयते संव
र्त्तिका। वृतु वर्त्तने। पद्मादि नवदल नामा॥ वरं श्रेष्ठ भरति वराटकः। अटपट ग
तौ॥ बीजकोश नामा॥४२॥ ॥इति वारिवर्गः॥ ॥उक्तं स्वर्व्योमदिक्कालधी
शब्दादि सनाट्यकं॥ पातालभोगीनरकं वारि चैषां च संगतं॥ ॥इत्यमरसिंह
कृतौ नामलिंगानुशासने॥ स्वरादिः प्रथमः कांडः सांग एव समर्थितः॥ ७ ॥
इति श्रीवंगलकामय्य महोपाध्यायस्तुलिंगय्यसूरि विरचितायाममरको
शपदविवृतौ प्रथमकांड विवेचनं॥ ॥श्रीः॥ ॥अथ भोमं द्वितीयकांड
मारभते॥ ॥वर्गाः पृथ्वीपुरक्ष्माभृद्वनौषधमृगादिभिः॥ नृब्रह्मक्षत्रविट् ७५
शूद्रैः सांगोपांगैरिहोदिताः॥ ॥इहास्मिन्कांडे सांगोपांगैः पृथ्वीपुरक्ष्माभृ

तेमनः मनज्ञाने मनोनामानि ३१ इतिश्रीवंगलकाम
रिविरचितायाममरकोशपदविवृतौकालवर्गः श्री बु
शेमुषीमतिः प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतना
मने मन्यतेमनीषा मनज्ञाने मनसः ईषावद्‌लांगलदंड
तिधिषणा धृषाप्रागल्भ्ये ध्यायंतिययाधीः ध्यैचिंताय
ज्ञाअवबोधने शेरयंमोहंमुष्णातिशेमुषी मुषस्तेये अनय
क्षा ईक्षदर्शने ययाउपलभ्यतेउपलब्धिः डुलभष्प्रा
तायां अनयासम्यग्वेत्तीतिसंवित् प्रतिपद्यतेऽनया
याज्ञप्तिः ज्ञाअवबोधने चेतयतेनयाचेतना १ धीर्धा
मानसं चिन्ताभोगोमनस्कारः चर्चासंख्याविचारणा
नुभूतंसर्वमस्यामितिवामेधा मेधृसंगमने स्मृतिस्तु

चेष्टयतेनेनसंकल्पः कुपक्लृप्तो मानसव्यापारनाम
सिकरोतिमनस्कारः मनःपरिस्पर्एतानामनी चर्चते
ख्यायतेनयासंख्या ख्याप्रकथने विचार्यतेनयाविच
र्षनामानि २ अध्याहारस्तर्कऊहोविचिकित्सातुसं
र्शयनिश्चयौ ३ अध्याहारइतिअध्याहारः तरति
वनतरणयोः ऊह्यतेनेनऊहः युक्तिप्रज्ञानामानि
वासे उभयकोटौसंशेतेसंशयः शीङ्स्वप्ने संदिह्
पचये स्थाणुर्वापुरुषोवेतिद्वौपक्षौयस्यद्वापरः संदे
तरानयतिनिर्णयः णीञ्प्रापणे निश्चिनोतिनिश्च
यिर्नास्तिकताव्यापारोद्देहश्चिंतनं समौसिद्धांत
इदमिथ्यमितिबुद्धिनामनी मिथ्याध्यवसायोदृष्टिश्च

म्रद्दनौषधिम्रगादिभिः॥न्रसूक्ष्मस्य चिद्दुभ्रद्वैः रूपलक्षिता द्दशावर्गाः छदिताः
वल्लुगकारतया॥त्र्यायासभावौ।अस्पाः सर्वभवती तिभ्रु॥भ्रसमायां॥उकारा
तस्त्रिलिंगोयं॥अव यं तुरे फोतं॥अ